मित्रयुप्रलयानां यादेरियः ७।३।२ न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ७।३।३ द्वारादीनां च ७।३।४ न्यग्रोधस्य च केवलस्य ७।
३।५ न कर्मव्यतिहारे ७।३।६ स्वागतादीनां च ७।३।७ श्वादेरिञि ७।३।८ पदान्तस्यान्यतरस्याम् ७।३।९ उत्तरपदस्य ७।३।१० अवयवा
दृतोः ७।३।११ सुसर्वार्धाज्जनपदस्य ७।३।१२ दिशोऽमद्राणाम् ७।३।१३ प्राचां ग्रामनगराणाम् ७।३।१४ संख्यायाः संवत्सरसंख्यस्य
च ७।३।१५ वर्षस्याभविष्यति ७।३।१६ परिमाणान्तस्यासंज्ञाशाणयोः ७।३।१७ जे प्रोष्ठपदानाम् ७।३।१८ हृद्भगसिन्ध्वन्ते पूर्वपदस्य
च ७।३।१९ अनुशतिकादीनां च ७।३।२० देवताद्वन्द्वे च ७।३।२१ नेन्द्रस्य परस्य ७।३।२२ दीर्घाच्च वरुणस्य ७।३।२३ प्राचां नगरान्ते ७।३
।२४ जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् ७।३।२५ अर्धात्परिमाणस्य पूर्वस्य तु वा ७।३।२६ नातः परस्य ७।३।२७ प्रवाहणस्य
ढे ७।३।२८ तत्प्रत्ययस्य च ७।३।२९ नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ७।३।३० यथातथयथापुरयोः पर्यायेण ७।३।३१ हनस्तो

अ० ७ चि णलोः ७।३।३२ आतो युक्चिण्कृतोः ७।३।३३ नोदात्तोपदेशस्य मान्तस्यानाचमेः ७।३।३४ जनिवध्योश्च ७।३।३५ अर्त्तिह्रीव्ली
५२ रीक्नूयीक्ष्माय्यातांपुग्णौ ७।३।३६ शाच्छासाह्वाव्यावेपां युक् ७।३।३७ वो विधूनने जुक् ७।३।३८ लीलोर्नुग्लुकावन्यतरस्यां स्ने
हविपातने ७।३।३९ भियो हेतुभये षुक् ७।३।४० स्फायो वः ७।३।४१ शदेरगतौ तः ७।३।४२ रुहः योन्यतरस्याम् ७।३।४३ प्रत्य
यस्थात्कात्पूर्वस्याऽतइदाऽप्यऽसुपः ७।३।४४ न यासयोः ७।३।४५ उदीचामातः स्थाने यकपूर्वायाः ७।३।४६ भस्त्रैषाजाज्ञाद्वा
स्वानञ्पूर्वाणामपि ७।३।४७ अभाषितपुंस्काच्च ७।३।४८ आदाचार्याणाम् ७।३।४९ ठस्येकः ७।३।५० इसुसुक्तान्तात्कः ७।३।
५१ चजोः कु घिण्ण्यतोः ७।३।५२ न्यङ्क्वादीनाञ्च ७।३।५३ हो हन्तेर्ञ्णिन्नेषु ७।३।५४ अभ्यासाच्च ७।३।५५ हेरचङि ७।३।५६ सन्लि
टोर्जेः ७।३।५७ विभाषा चेः ७।३।५८ न क्वादेः ७।३।५९ अजिव्रज्योश्च ७।३।६० मुजन्युब्जौ पाण्युपतापयोः ७।३।६१ प्रयाजानुयाजौ
यज्ञाङ्गे ७।३।६२ वञ्चेर्गतौ ७।३।६३ ओक उचः के ७।३।६४ ण्य आवश्यके ७।३।६५ यजयाचरुचप्रवचर्चश्च ७।३।६६ वचोऽशब्दसं
ज्ञायाम् ७।३।६७ प्रयोज्यनियोज्यौ शक्यार्थे ७।३।६८ भोज्यं भक्ष्ये ७।३।६९ घोर्लोपो लेटि वा ७।३।७० ओतः श्यनि ७।३।७१ क्सस्या॥ रामः
चि ७।३।७२ लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ७।३।७३ शमामष्टानां दीर्घः श्यनि ७।३।७४ ष्ठिवुक्लमुचमां शिति ७।३।७५ ५२
क्रमः परस्मैपदेषु ७।३।७६ इषुगमियमां छः ७।३।७७ पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छप

देर्लघोः ७।२।७ नेड्वशिकृति ७।२।८ तितुत्रतथसिसुसरकसेषु च ७।२।९ एकाच उपदेशेऽनुदात्तात् ७।२।१० श्र्युकः किति ७।२।
११ सनि ग्रहगुहोश्च ७।२।१२ कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ७।२।१३ श्वीदितो निष्ठायाम् ७।२।१४ यस्य विभाषा ७।२।१५ आदि
तश्च ७।२।१६ विभाषा भावादिकर्म्मणोः ७।२।१७ क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ता
विस्पष्टस्वरानायासभृशेषु ७।२।१८ धृषिशसी वैयात्ये ७।२।१९ दृढः स्थूलबलयोः ७।२।२० प्रभौ परिवृढः ७।२।२१ कृच्छ्रगहनयोः क
षः ७।२।२२ घुषिरविशब्दने ७।२।२३ अर्देः संनिविभ्यः ७।२।२४ अभेश्चाविदूर्ये ७।२।२५ णेरध्ययने वृत्तम् ७।२।२६ वा दान्तशा
न्तपूर्णदस्तस्पष्टछन्नज्ञप्ताः ७।२।२७ रुष्यमत्वरसंघुषास्वनाम् ७।२।२८ हृषेर्लोमसु ७।२।२९ अपचितश्च ७।२।३० हु ह्वरेश्छन्द
सि ७।२।३१ अपरिह्वृताश्च ७।२।३२ सोमे ह्वरितः ७।२।३३ ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरू
तृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च ७।२।३४ आर्द्धधातुकस्येड्वलादेः ७।२।३५ स्नुक्रमोरनात्मनेपदनिमि
त्ते ७।२।३६ ग्रहोऽलिटि दीर्घः ७।२।३७ वॄतो वा ७।२।३८ न लिङि ७।२।३९ सिचि च परस्मैपदेषु ७।२।४० इट् सनि वा ७।२।४१ लिङ्सिचोरा
त्मनेपदेषु ७।२।४२ ऋतश्च संयोगादेः ७।२।४३ स्वरतिसूतिसूयतिधूञूदितो वा ७।२।४४ रधादिभ्यश्च ७।२।४५ निरः कुषः ७।२।४६
इण्निष्ठायाम् ७।२।४७ तीषसहलुभरुषरिषः ७।२।४८ सनीवन्तर्द्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ७।२।४९ क्लिशः क्त्वानि

अ॰ ७ गादेर्गुणः ७।४।१० ऋच्छत्यॄताम् ७।४।११ शॄदॄप्रां ह्रस्वो वा ७।४।१२ केऽणः ७।४।१३ न कपि ७।४।१४ आपोऽन्यतरस्याम् ७।४।१५
५३ ऋदृशोऽङि गुणः ७।४।१६ अस्यतेस्थुक् ७।४।१७ श्वयतेरः ७।४।१८ पतः पुम् ७।४।१९ वच उम् ७।४।२० शीङः सार्वधातुके गु
णः ७।४।२१ अयङ् यि क्ङिति ७।४।२२ उपसर्गाद्ध्रस्व ऊहतेः ७।४।२३ एतेर्लिङि ७।४।२४ अकृत्सार्वधातुकयोर्दीर्घः ७।४।२५
च्वौ च ७।४।२६ रीङ् ऋतः ७।४।२७ रिङ् शयग्लिङ्क्षु ७।४।२८ गुणोऽर्तिसंयोगाद्योः ७।४।२९ यङि च ७।४।३० ई घ्राध्मोः ७।४।३१ अस्य
च्वौ ७।४।३२ क्यचि च ७।४।३३ अशनायोदन्यधनाया बुभुक्षापिपासागर्द्धेषु ७।४।३४ न च्छन्दस्यपुत्रस्य ७।४।३५ दुरस्युर्द्रविणस्यु
र्वृषण्यति रिषण्यति ७।४।३६ अश्वाघस्यात् ७।४।३७ देवसुम्नयोर्यजुषि काठके ७।४।३८ कव्यध्वरपृतनस्यर्चि लोपः ७।४।३९
द्यतिस्यतिमास्थामित्ति किति ७।४।४० शाच्छोरन्यतरस्याम् ७।४।४१ दधातेर्हिः ७।४।४२ जहातेश्च क्त्वि ७।४।४३ विभाषा छन्दसि ७।४
।४४ सुधितवसुधितनेमधितधिष्वधिषीय च ७।४।४५ दो दद्घोः ७।४।४६ अच उपसर्गात्तः ७।४।४७ अपो भि ७।४।४८ सः स्याऽर्द्ध
धातुके ७।४।४९ तासस्त्योर्लोपः ७।४।५० रि च ७।४।५१ ह एति ७।४।५२ यीवर्णयोर्दीधीवेव्योः ७।४।५३ सनि मीमाघुरभलभशक राम॰
पतपदामच इस् ७।४।५४ आप्ज्ञप्यृधामीत् ७।४।५५ दम्भ इच्च ७।४।५६ मुचोऽकर्मकस्य गुणो वा ७।४।५७ अत्र लोपोऽभ्या ५३
सस्य ७।४।५८ ह्रस्वः ७।४।५९ हलादिः शेषः ७।४।६० शर्पूर्वाः खयः ७।४।६१ कुहोश्चुः ७।४।६२ न कवतेर्यङि ७।४।६३ कृषेश्छ

न्दसि ७।४।६४ दाधर्त्तिदर्द्धर्त्तिदर्द्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदवि
द्युतत्तरित्रतः सरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च ७।४।६५ उरत् ७।४।६६ द्युतिस्वाप्योः सम्प्रसारणम् ७।४।६७ व्यथो
लिटि ७।४।६८ दीर्घ इणः किति ७।४।६९ अत आदेः ७।४।७० तस्मान्नुड्द्विहलः ७।४।७१ अश्नोतेश्च ७।४।७२ भवतेरः ७।४।७३
ससूवेति निगमे ७।४।७४ णिजां त्रयाणां गुणः श्लौ ७।४।७५ भृञामित् ७।४।७६ अर्त्तिपिपर्त्योश्च ७।४।७७ बहुलं छन्दसि ७।
४।७८ सन्यतः ७।४।७९ ओः पुयण्ज्यपरे ७।४।८० स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा ७।४।८१ गुणो यङ्लुकोः ७
।४।८२ दीर्घोऽकितः ७।४।८३ नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् ७।४।८४ नुगतोऽनुनासिकान्तस्य ७।४।८५ जपजभदह
दशभञ्जपशां च ७।४।८६ चरफलोश्च ७।४।८७ उत्परस्यातः ७।४।८८ ति च ७।४।८९ रीगृदुपधस्य च ७।४।९० रुग्रिकौ च लुकि
७।४।९१ ऋतश्च ७।४।९२ सन्वल्लघुनि चङ्परेऽनग्लोपे ७।४।९३ दीर्घो लघोः ७।४।९४ अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम् ७।४।९५
विभाषा वेष्टिचेष्ट्योः ७।४।९६ ई च गणः ७।४।९७ रोचशीङः शाच्छेश्छापूर्वोस्रवति सप्तदश॥ इति श्रीसप्तमाध्यायस्य चतुर्थः।
पादः॥ इति श्रीसप्तमोऽध्यायः समाप्तः॥ सर्वस्य द्वे ८।१।१ तस्य परमाम्रेडितम् ८।१।२ अनुदात्तं च ८।१।३ नित्यवीप्सयोः ८।१।४ प
रेर्वर्जने ८।१।५ प्रसमुपोदः पादपूरणे ८।१।६ उपर्यध्यधसः सामीप्ये ८।१।७ वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सन

अ॰८ भर्त्सनेषु ८।१।८ एकम्बहुव्रीहिवत् ८।१।९ आबाधे च ८।१।१० कर्म्मधारयवदुत्तरेषु ८।१।११ प्रकारे गुणवचनस्य ८।१।१२ अकृच्छ्रे
५५ प्रियसुखयोरन्यतरस्याम् ८।१।१३ यथास्वे यथायथम् ८।१।१४ द्वन्द्वं रहस्यमर्य्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाऽभिव्य
क्तिषु ८।१।१५ पदस्य ८।१।१६ पदात् ८।१।१७ अनुदात्तं सर्व्वमपादादौ ८।१।१८ आमन्त्रितस्य च ८।१।१९ युष्मदस्मदोः षष्ठीचतुर्थी
द्वितीयास्थयोर्वान्नावौ ८।१।२० बहुवचनस्य वस्नसौ ८।१।२१ तेमयावेकवचनस्य ८।१।२२ त्वामौ द्वितीयायाः ८।१।२३ न चवा
हाहैवयुक्ते ८।१।२४ पश्यार्थैश्चानालोचने ८।१।२५ सपूर्वायाः प्रथमाया विभाषा ८।१।२६ तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ८।
१।२७ तिङ्ङतिङः ८।१।२८ न लुट् ८।१।२९ निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ८।१।३० नह प्रत्यारम्भे ८।१।३१
सत्यम्प्रश्ने ८।१।३२ अङ्गाप्रातिलोम्ये ८।१।३३ हि च ८।१।३४ छन्दस्यऽनेकमपि साकाङ्क्षम् ८।१।३५ यावद्यथाभ्याम् ८।१।३६ पू
जायान्नानन्तरम् ८।१।३७ उपसर्गव्यपेतञ्च ८।१।३८ तुपश्यपश्यताहैः पूजायाम् ८।१।३९ अहो च ८।१।४० शेषे विभाषा ८।१।४१ पु
रा च परीप्सायाम् ८।१।४२ नन्वित्यनुज्ञैषणायाम् ८।१।४३ किं क्रियाप्रश्नेनुपसर्गमप्रतिषिद्धम् ८।१।४४ लोपे विभाषा ८।१।४५ ए राम:
हि मन्ये प्रहासे लृट् ८।१।४६ जात्वपूर्वम् ८।१।४७ किम्वृत्तञ्च चिदुत्तरम् ८।१।४८ आहो उताहो चाऽनन्तरम् ८।१।४९ शेषवि ५५
भाषा ८।१।५० गत्यर्थलोटा लृण्न चेत्कारकं सर्व्वान्यत् ८।१।५१ लोट् च ८।१।५२ विभाषितं सोपसर्गमनुत्तमम् ८।१।५३ हन्त च ८।

श्यर्छ्धौशीयसीदाः ७।३।७८ ज्ञाजनोर्जा ७।३।७९ घ्वादीनांह्रस्वः ७।३।८० मीनातेर्निगमे ७।३।८१ मिदेर्गुणः ७।३।८२ जुसिच
७।३।८३ सार्वधातुकार्द्धधातुकयोः ७।३।८४ जाग्रोविचिण्णल्ङित्सु ७।३।८५ पुगन्तलघूपधस्यच ७।३।८६ नाभ्यस्तस्याचिपितिसार्व
धातुके ७।३।८७ भूसुवोस्तिङि ७।३।८८ उतोवृद्धिर्लुकिहलि ७।३।८९ ऊर्णोतेर्विभाषा ७।३।९० गुणोपृक्ते ७।३।९१ तृणहइम् ७।३।
९२ ब्रुवईट् ७।३।९३ यङोवा ७।३।९४ तुरुस्तुशम्यमः सार्वधातुके ७।३।९५ अस्तिसिचोपृक्ते ७।३।९६ बहुलञ्छंदसि ७।३।९७ रुद
श्चपञ्चभ्यः ७।३।९८ अड्गार्ग्यगालवयोः ७।३।९९ अदः सर्वेषाम् ७।३।१०० अतोदीर्घोयञि ७।३।१०१ सुपिच ७।३।१०२ बहुवचनेझ
ल्येत् ७।३।१०३ ओसिच ७।३।१०४ आङिचापः ७।३।१० सम्बुद्धौच ७।३।१०६ अम्बार्थनद्योर्ह्रस्वः ७।३।१०७ ह्रस्वस्यगुणः ७।३।१०८
जसिच ७।३।१०९ ऋतोङिसर्वनामस्थानयोः ७।३।११० घेर्ङिति ७।३।१११ आण्नद्याः ७।३।११२ याडापः ७।३।११३ सर्वनाम्नः स्याड्ढ्र
स्वश्च ७।३।११४ विभाषाद्वितीयातृतीयाभ्याम् ७।३।११५ ङेराम्नद्याम्नीभ्यः ७।३।११६ इदुद्भ्याम् ७।३।११७ औत् ७।३।११८ अच्चघेः ७
।३।११९ आङोनास्त्रियाम् ७।३।१२० देवीकादेवतास्फायोभुजन्युञ्जोमीनातेरतोदीर्घोविंशतिः॥ इतिसप्तमाध्यायस्यतृतीयः पादः॥
णौचङ्युपधायाह्रस्वः ७।४।१ नाग्लोपिशास्वृदिताम् ७।४।२ भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ७।४।३ लोपः पिबतेरी
च्चाभ्यासस्य ७।४।४ तिष्ठतेरित् ७।४।५ जिघ्रतेर्वा ७।४।६ उर्ऋत् ७।४।७ नित्यंछन्दसि ७।४।८ दयतेर्दिगिलिटि ७।४।९ ऋतश्चसंयो

अ०८ लोक् लि ८।२।२६ ह्रस्वादंगात् ८।२।२७ इट ईटि ८।२।२८ स्कोः संयोगाद्योरन्ते च ८।२।२९ चोः कुः ८।२।३० हो ढः ८।२।३१ दादेर्धा
४५ तोर्घः ८।२।३२ वा द्रुहमुहष्णुहष्णिहाम् ८।२।३३ नहो धः ८।२।३४ आहस्थः ८।२।३५ व्रश्चभ्रस्जसृजमृजयजराजभ्राजछशां षः
८।२।३६ एकाचो बशो भष् झषन्तस्य स्ध्वोः ८।२।३७ दधस्तथोश्च ८।२।३८ झलां जशोऽन्ते ८।२।३९ झषस्तथोर्धोऽधः ८।२।४० षढोः
कः सि ८।२।४१ रदाभ्यां निष्ठातो नः पूर्वस्य च दः ८।२।४२ संयोगादेरातो धातोर्यण्वतः ८।२।४३ ल्वादिभ्यः ८।२।४४ ओदितश्च ८
।२।४५ क्षियो दीर्घात् ८।२।४६ श्योऽस्पर्शे ८।२।४७ अञ्चोऽनपादाने ८।२।४८ दिवोऽविजिगीषायाम् ८।२।४९ निर्वाणोऽवाते ८।२।
५० शुषः कः ८।२।५१ पचो वः ८।२।५२ क्षायो मः ८।२।५३ प्रस्त्योऽन्यतरस्याम् ८।२।५४ अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः ८।२।५५
नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् ८।२।५६ न ध्याख्यापॄमूर्छिमदाम् ८।२।५७ वित्तो भोगप्रत्यययोः ८।२।५८ भित्तं शकलम् ८।
२।५९ ऋणमाधमर्ण्ये ८।२।६० नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि ८।२।६१ क्विन्प्रत्ययस्य कुः ८।२।६२ नशेर्वा ८
।२।६३ मो नो धातोः ८।२।६४ म्वोश्च ८।२।६५ ससजुषो रुः ८।२।६६ अवयाः श्वेतवाः पुरोडाश्च ८।२।६७ अहन् ८।२।६८ रोऽसुपि ८। रामः
२।६९ अम्नरूधरवरित्युभयथा छन्दसि ८।२।७० भुवश्च महाव्याहृतेः ८।२।७१ वसुस्रंसुध्वंस्वनडुहां दः ८।२।७२ तिप्यनस्तेः ८। ४५
२।७३ सिपि धातो रुर्वा ८।२।७४ दश्च ८।२।७५ र्वोरुपधाया दीर्घ इकः ८।२।७६ हलि च ८।२।७७ उपधायां च ८।२।७८ न भकुर्छुराम्

८।२।७९ अदसोऽसेर्दादु दो मः ८।२।८० एतईद्बहुवचने ८।२।८१ वाक्यस्य टेः प्लुत उदात्तः ८।२।८२ प्रत्यभिवादेऽशूद्रे ८।२।८३ दू
राद्धूते च ८।२।८४ हैहेप्रयोगे हैहयोः ८।२।८५ गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ८।२।८६ ओमभ्यादाने ८।२।८७ ये यज्ञकर्म
णि ८।२।८८ प्रणवष्टेः ८।२।८९ याज्यान्तः ८।२।९० ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः ८।२।९१ अग्नीत्प्रेषणे परस्य च ८।२।९२ वि
भाषा पृष्टप्रतिवचने हेः ८।२।९३ निगृह्यानुयोगे च ८।२।९४ आम्रेडितम्भर्त्सने ८।२।९५ अङ्गयुक्तन्तिङाऽकाङ्क्षम् ८।२।९६ वि
चार्यमाणानाम् ८।२।९७ पूर्वन्तु भाषायाम् ८।२।९८ प्रतिश्रवणे च ८।२।९९ अनुदात्तं प्रश्नान्ताभिपूजितयोः ८।२।१०० चिदिति
चोपमार्थे प्रयुज्यमाने ८।२।१०१ उपरिस्विदासीदिति च ८।२।१०२ स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु ८।२।१०३ क्षि
याशिःप्रैषेषु तिङाकाङ्क्षम् ८।२।१०४ अनन्त्यस्यापि प्रश्नाख्यानयोः ८।२।१०५ प्लुतावैच इदुतौ ८।२।१०६ एचोऽप्रगृह्यस्यादूराद्धूते
पूर्वस्यार्द्धस्यादुत्तरस्येदुतौ ८।२।१०७ तयोर्य्वावचि संहितायाम् ८।२।१०८ पूर्वत्राचिषढोर्नसन्ते एतर्द्रुचिदित्यष्टौ ॥ इति अष्टमाध्या
यस्य द्वितीयः पादः मतुवसो रुः सम्बुद्धौ छन्दसि ८।३।१ अत्रानुनासिकः पूर्वस्य तु वा ८।३।२ आतोऽटि नित्यम् ८।३।३ अनुनासिकात्प
रोऽनुस्वारः ८।३।४ समः सुटि ८।३।५ पुमः खय्यम्परे ८।३।६ नश्छव्यप्रशान् ८।३।७ उभयथर्क्षु ८।३।८ दीर्घादटि समानपादे ८।३।९ नॄ
न्पे ८।३।१० स्वतवान्पायौ ८।३।११ कानाम्रेडिते ८।३।१२ ढो ढे लोपः ८।३।१३ रो रि ८।३।१४ खरवसानयोर्विसर्जनीयः ८।३।१५ रोः सुपि

अ० ८ ८।३।१६ भोभगोअघोअपूर्व्वस्ययोशि ८।३।१७ व्योर्लघुप्रयत्नतरः शाकटायनस्य ८।३।१८ लोपः शाकल्यस्य ८।३।१९ ओतोगार्ग्यस्य
५६ ८।३।२० उञिचपदे ८।३।२१ हलिसर्व्वेषाम् ८।३।२२ मोनुस्वारः ८।३।२३ नश्चाऽपदान्तस्यझलि ८।३।२४ मोराजिसमः क्वौ ८।३।२५
हेमपरेवा ८।३।२६ नपरेनः ८।३।२७ ङ्णोः कुक्टुक्शरि ८।३।२८ डः सिधुट् ८।३।२९ नश्च ८।३।३० शितुक् ८।३।३१ ङमोह्रस्वादचिङ
मुण्नित्यम् ८।३।३२ मयउञोवोवा ८।३।३३ विसर्ज्जनीयस्यसः ८।३।३४ शर्प्परेविसर्ज्जनीयः ८।३।३५ वाशरि ८।३।३६ कुप्वोः क
कपौच ८।३।३७ सोपदादौ ८।३।३८ इणःषः ८।३।३९ नमस्पुरसोर्गत्योः ८।३।४० इदुदुपधस्यचाप्रत्ययस्य ८।३।४१ तिरसोऽ
न्यतरस्याम् ८।३।४२ द्विस्त्रिश्चतुरितिकृत्वोर्थे ८।३।४३ इसुसोः सामर्थ्ये ८।३।४४ नित्यंसमासेनुत्तरपदस्थस्य ८।३।४५ अतः कृ
कमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ८।३।४६ अधः शिरसीपदे ८।३।४७ कस्कादिषुच ८।३।४८ छन्दसिवाप्राम्रेडितयोः ८
।३।४९ कः करत्कारतिकृधिकृतेष्वनदितेः ८।३।५० पञ्चम्याः परावध्यर्थे ८।३।५१ पातौचबहुलम् ८।३।५२ षष्ठ्याः पतिपुत्रपृष्ठपार
पदपयस्पोषेषु ८।३।५३ इडायावा ८।३।५४ अपदान्तस्यमूर्द्धन्यः ८।३।५५ सहेः साडः सः ८।३।५६ इण्कोः ८।३।५७ नुम्विसर्ज्जनीयश राम
र्व्यवायेपि ८।३।५८ आदेशप्रत्यययोः ८।३।५९ शासिवसिघसीनाञ्च ८।३।६० स्तौतिण्योरेवषण्यभ्यासात् ८।३।६१ सः स्विदिस्वदिस [illegible]
हीनाञ्च ८।३।६२ प्राक्सितादड्व्यवायेपि ८।३।६३ स्थादिष्वभ्यासेनचाभ्यासस्य ८।३।६४ उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तो।

१।५४ आमएकान्तरमामन्त्रितमनन्तिके ८।१।५५ यद्धितुपरंछन्दसि ८।१।५६ चनचिदिवगोत्रादितद्धिताऽम्रेडितेष्वगतेः ८।१।५७
चादिषुच ८।१।५८ चवायोगेप्रथमा ८।१।५९ हेतिक्षियायाम् ८।१।६० अहेतिविनियोगेच ८।१।६१ चाहलोपएवेत्यवधारण
म् ८।१।६२ चादिलोपेविभाषा ८।१।६३ वैवावेतिचच्छन्दसि ८।१।६४ एकान्याभ्यांसमर्थाभ्याम् ८।१।६५ यद्वृत्तान्नित्यम् ८।१।६६
पूजनात्पूजितमनुदात्तंकाष्ठादिभ्यः ८।१।६७ सगतिरपितिङ् ८।१।६८ कुत्सनेचसुप्यगोत्रादौ ८।१।६९ गतिर्गतौ ८।१।७० तिङि
चोदात्तवति ८।१।७१ आमन्त्रितम्पूर्वमविद्यमानवत् ८।१।७२ नामन्त्रितेसमानाधिकरणेसामान्यवचनम् ८।१।७३ विभाषि
तंविशेषवचनेबहुवचनम् ८।१।७४ सर्वस्यबहुवचनशेषेअहेतिचतुर्दश॥ इत्यष्टाध्यायस्यप्रथमःपादः॥ पूर्वत्रासिद्ध
म् ८।२।१ नलोपःसुप्स्वरसंज्ञातुग्विधिषुकृति ८।२।२ नमुने ८।२।३ उदात्तस्वरितयोर्यणःस्वरितोनुदात्तस्य ८।२।४ एकादेशउदा
त्तेनोदात्तः ८।२।५ स्वरितोवानुदात्तेपदादौ ८।२।६ नलोपःप्रातिपदिकान्तस्य ८।२।७ नङिसम्बुद्ध्योः ८।२।८ मादुपधायाश्चमतो
र्वोयवादिभ्यः ८।२।९ झयः ८।२।१० संज्ञायाम् ८।२।११ आसंदीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ८।२।१२ उदन्वानुदधौ
च ८।२।१३ राजन्वान्सौराज्ये ८।२।१४ छन्दसीरः ८।२।१५ अनोनुट् ८।२।१६ नाद्धस्य ८।२।१७ कृपोरोलः ८।२।१८ उपसर्गस्यायतौ ८।२
।१९ ग्रोयङि ८।२।२० अचिविभाषा ८।२।२१ परस्यघाङ्कयोः ८।२।२२ संयोगान्तस्यलोपः ८।२।२३ रात्सस्य ८।२।२४ धिच ८।२।२५ कृ

मिगमिप्यायीवेयाम् ८।४।३४ षात्पदान्तात् ८।४।३५ नशेःषान्तस्य ८।४।३६ पदान्तस्य ८।४।३७ पदव्यवायेपि ८।४।३८ क्षुभ्नादिषुच ८।४।३९ स्तोःश्चुनाश्चुः ८।४।४० ष्टुनाष्टुः ८।४।४१ नपदान्ताट्टोरनाम् ८।४।४२ तोःषि ८।४।४३ शात् ८।४।४४ यरोऽनुनासिकेऽनुनासिकोवा ८।४।४५ अचोरहाभ्यांद्वे ८।४।४६ अनचिच ८।४।४७ नादिन्याक्रोशेपुत्रस्य ८।४।४८ शरोचि ८।४।४९ त्रिप्रभृतिषुशाकटायनस्य ८।४।५० सर्वत्रशाकल्यस्य ८।४।५१ दीर्घादाचार्य्याणाम् ८।४।५२ झलांजशूझशि ८।४।५३ अभ्यासेचर्च्च ८।४।५४ खरिच ८।४।५५ वावसाने ८।४।५६ अणोप्रगृह्यस्यानुनासिकः ८।४।५७ अनुस्वारस्ययियिपरसवर्णः ८।४।५८ वापदान्तस्य ८।४।५९ तोर्लि ८।४।६० उदःस्थास्तम्भोःपूर्वस्य ८।४।६१ झयोहोन्यतरस्याम् ८।४।६२ शश्छोटि ८।४।६३ हलोयमांयमिलोपः ८।४।६४ झरोझरिसवर्णे ८।४।६५ उदात्तादनुदात्तस्यस्वरितः ८।४।६६ नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् ८।४।६७ अअ ८।४।६८ रषाभ्यामुभोष्टुनोद्रोऽष्टौ। इत्यष्टमाध्यायस्यचतुर्थःपादः॥ इत्यष्टमोध्यायस्समाप्तः॥ शुभम्॥ श्रीसम्वत् १९ ३४ मीतिआषाढकृष्णः १ भौमवासरे शुभंभुयात्॥ ॥ ॥ ॥

अ०८ स्पृशिस्पृहिसवनादीनाम् ८।३।११० सात्पदाद्योः ८।३।१११ सिचो यङि ८।३।११२ सेधतेर्गतौ ८।३।११३ प्रतिस्तब्धनिस्तब्धौ च ८।३।
५७ ११४ सोढः ८।३।११५ स्तम्भुसिवुसहां चङि ८।३।११६ सुनोतेः स्यसनोः ८।३।११७ सदेः परस्य लिटि ८।३।११८ निव्यभिभ्योऽड्व्यवाये वा छ
न्दसि ८।३।११९ मतुवसोरुजिचेदुदुपधस्तोनिरायोमीरोर्युष्मदेकोनविंशतिः ॥ इत्यष्टमाध्यायस्य तृतीयः पादः ॥ समाप्तः ॥ रषा
भ्यां नो णः समानपदे ८।४।१ अट्कुप्वाङ्नुम्व्यवायेपि ८।४।२ पूर्वपदात्संज्ञायामगः ८।४।३ वनम्पुरगामिश्रकासिध्रकासारिकाको
टराग्रेभ्यः ८।४।४ प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि ८।४।५ विभाषौषधिवनस्पतिभ्यः ८।४।६ अह्नो
ऽदन्तात् ८।४।७ वाहनमाहितात् ८।४।८ पानं देशे ८।४।९ वा भावकरणयोः ८।४।१० प्रातिपदिकान्तनुम्विभक्तिषु च ८।४।११
एकाजुत्तरपदे णः ८।४।१२ कुमति च ८।४।१३ उपसर्गादसमासेपि णोपदेशस्य ८।४।१४ हिनुमीना ८।४।१५ आनि लोट् ८।४।
१६ नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ८।४।१७ शेषे विभाषाऽकखा
दावषान्त उपदेशे ८।४।१८ अनितेः ८।४।१९ अन्तः ८।४।२० उभौ साभ्यासस्य ८।४।२१ हन्तेरत्पूर्वस्य ८।४।२२ वमोर्वा ८।४।२३ अ रा०
न्तरदेशे ८।४।२४ अयनञ्च ८।४।२५ छन्दस्यृदवग्रहात् ८।४।२६ नश्च धातुस्थोरुषुभ्यः ८।४।२७ उपसर्गादनोत्परः ८।४।२८ कृ ५७
त्यचः ८।४।२९ णेर्विभाषा ८।४।३० हलश्चेजुपधात् ८।४।३१ इजादेः सनुमः ८।४।३२ वा निंसनिक्षनिन्दाम् ८।४।३३ नभाभूपूक

भतिस्यासेनयसेधसिचसञ्जस्वञ्जाम् ८।३।६५ सदिरप्रतेः ८।३।६६ स्तन्भेः ८।३।६७ अवाच्चाऽलम्बनाऽविदूर्ययोः ८।३।६८ वेश्च
स्वनो भोजने ८।३।६९ परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ८।३।७० सिवादीनां वाड्व्यवायेपि ८।३।७१ अनुविपर्य्य-
भिनिभ्यः स्यन्दतेरप्राणिषु ८।३।७२ वेः स्कन्देरनिष्ठायाम् ८।३।७३ परेश्च ८।३।७४ परिस्कन्दः प्राच्यभरतेषु ८।३।७५ स्फुरतिस्फुलत्यो-
र्निर्निविभ्यः ८।३।७६ वेः स्कभ्नातेर्नित्यम् ८।३।७७ इणः षीध्वंलुङ्लिटां धोऽङ्गात् ८।३।७८ विभाषेटः ८।३।७९ समासेऽङ्गुलेः सङ्गः ८।३।८०
भीरोः स्थानम् ८।३।८१ अग्नेः स्तुत्स्तोमसोमाः ८।३।८२ ज्योतिरायुषः स्तोमः ८।३।८३ मातृपितृभ्यां स्वसा ८।३।८४ मातुःपितुर्भ्यामन्यतरस्या-
म् ८।३।८५ अभिनिसः स्तनः शब्दसंज्ञायाम् ८।३।८६ उपसर्गप्रादुर्भ्यामस्तिर्य्यच्परः ८।३।८७ सुविनिर्दुर्भ्यः सुपिसूतिसमाः ८।३।८८ नि-
नदीभ्यां स्नातेः कौशले ८।३।८९ सूत्रम्प्रतिष्णातम् ८।३।९० कपिष्ठलो गोत्रे ८।३।९१ प्रष्ठोऽग्रगामिनि ८।३।९२ वृक्षासनयोर्विष्टरः ८।३।९३
छन्दोनाम्नि च ८।३।९४ गवियुधिभ्यां स्थिरः ८।३।९५ विकुशमिपरिभ्यः स्थलम् ८।३।९६ अम्बाऽम्बगोभूमिसव्यापद्वित्रिकुशेकुशं-
कङ्गुमञ्जिपुञ्जिपरमेवर्हिर्दिव्यग्निभ्यः स्थः ८।३।९७ सुषामादिषु च ८।३।९८ एति संज्ञायामगात् ८।३।९९ नक्षत्राद्वा ८।३।१०० ह्र-
स्वात्तादौ तद्धिते ८।३।१०१ निसस्तपतावनासेवने ८।३।१०२ युष्मत्तत्ततक्षुःष्वन्तःपादम् ८।३।१०३ यजुष्येकेषाम् ८।३।१०४ स्तुतस्तो-
मयोश्छन्दसि ८।३।१०५ पूर्वपदात् ८।३।१०६ सुञः ८।३।१०७ सनोतेरनः ८।३।१०८ सहेः पृतनर्त्तीभ्याञ्च ८।३।१०९ नरपरसृपिसृजि

॥ इतिअष्टाध्यायीसमाप्तोयंशुभंभुयात्० ॥

शां.क.टी. ॥ श्रीगणेशाय नमः ॥ आदिरिति। यद्यपि परिभाषादेशविधिसूत्राणामुपस्थितौ गुणभेदकल्पनेन पदैकवाक्यतानान्य
१ था इको यणचीत्यादौ तद्विधीनां व्यवहिताव्यवहितसाधारण्ये प्रवृत्तौ पश्चात्परिभाषैकवाक्यतायामपि जातनिवृ
त्त्ययोगात्। भुक्तवंतं प्रतीति न्यायविरोधापत्तेश्च प्राचीनोक्तवाक्यैकवाक्यताकर्तुमशक्या। संज्ञाशास्त्राणां तु मृजेर्वृ
द्धिरित्यादौ वृद्धिपदश्रुत्योपस्थितवृद्धिरादैजित्यस्य तदर्थज्ञानाय वृद्धिपदाभिन्ना आदैच इति बोधे मृजेरिकः स्थाने
वृद्धिपदाभिन्ना आदैचो भवंतीत्येतावतैव वाक्यैकवाक्यताव्यवहार इति नोक्तदोषस्तत्रैव वृद्धिपदानर्थक्यं तु।
नोपस्थापकतया चारितार्थ्यात्तथापि उक्तषष्ठीस्थानइति सूत्रभाष्यं तु प्राचीनैर्लोपयितुं शक्यं तथा हि कार्यका।
लपक्षे प्रदेशैकवाक्यतया स्वबुद्धिजननवशाद्यथोद्देशेपि स्वदेशे वाक्यार्थस्य सत्वेन न तदर्थोपस्थित्यैव सर्वप्र
काशकत्वस्य संज्ञाशास्त्रवत्सत्वात्। किंच भाष्ये एकादेशस्थत्वमनुपपन्नं। यथाव्यवहर्तृणां तत्तद्देशागमने तत्तद्देशी
यत्वव्यवहाराभावेपि तस्य भावार्थकप्रत्ययांतत्वात्तत्तद्देशस्थत्वव्यवहारस्य दुर्वारत्वेन तत्र च तद्वत्प्रकृतेपि स
त्वादेवं च दृष्टांतदार्ष्टांतिकयोर्वैषम्यं स्पष्टमेव। परं च परिभाषाणामुभयपक्षेपि पदैकवाक्यता लाघवादादर्त्तव्या राम·
संज्ञाशास्त्राणां तु यद्यपि अदसो मादिति सूत्रभाष्यप्रामाण्यात्कार्यकालपक्षे प्रदेश एव वाक्यार्थबोधस्तत्रापि पर १

त्विनपूर्वत्वेन च विप्रतिषेध प्रवृत्तिः। पूर्वत्रासिद्धमित्यस्य च प्रवृत्तिरिति लभ्यते। तथाहि मुत्वासिद्धत्वात्प्रकृतिभा
वो न प्राप्नोतीत्याशंक्य सामर्थ्यात्तदभाव इत्युक्तावस्मणो प्रगृह्यस्येत्येतत्प्रतिबंधेन     कार्यकालपक्षे सार्थक्य
मिति संखंड्य सर्वं तर्हि यद्येनावश्यं योगनं स्यात्तत्रैवायं ब्रूयाददसो प्रगृह्यस्यादसो मेत्युक्तमग्रेपि मुत्वाद्यसिद्धत्वा
दयादीनां प्राप्तिमुद्भाव्य परैव प्रगृह्यसंज्ञेति समाहितं तथापि न तद्युक्तिमत्। तस्मिन्निति सूत्रस्थन्यायसिद्धभाष्य।
स्वारस्येन नत्यक्षेपि पाठक्रमपरत्वस्यैव तत्रापि लाभात्। पदपदार्थोपस्थितेर्वाक्यार्थबोधे प्रतिबंधकाभा।
वाच्च संज्ञापरिभाषयोरेकरूप्यलाभे वैरूप्यकल्पनस्यायुक्तत्वाच्च विरोधस्य कार्यज्ञानाधीनत्वेन सार्वधातु।
कार्धधातुकयोरित्यत्र गुणापदस्थत्वस्यापेक्षया लिंगस्य दुर्बलत्वेन न तन्निमित्तेषाइक्परिभाषापदैकवाक्यत
यान्वयवत्यंतरंगस्यानपष्ठातनिर्णयोपस्थितालोन्त्यपरिभाषावाक्यैकवाक्यतयान्वय इति बहिरंगासेति।
त्वदीयशब्दरत्नासंगतेश्च। अंतरंगपरिभाषाया अपि विरोधे सत्येव प्रवृत्त्यात्तज्ज्ञानस्य तद्दोषो नरकालि
कत्वेन तदानीं विरोधाभावेन न दसंगतिः। अदसो मादित्यत्र भाष्ये परैवेत्यस्य तत्प्रयुक्तप्रकृतिभाव इत्येवा
र्थ आशयानभिज्ञस्याग्रे प्रश्नः। कथं कार्यकालमित्यादौ स्येकदेश्युत्तरमेवं च न तद्विरोधः। तत्रापि स्वगृ।

हेवाक्यार्थबोधः पूर्ववत्। अतएवभाष्येसंज्ञापरिभाषयोरविशेषेणैकदेशस्थत्वमुक्तं। कश्चित्परिभा
षारूपइतिकैयटोक्तंनयुक्तं। परार्थत्वेनपरिभाषाणामिवसंज्ञानामपितुल्यत्वात्। अतएवसर्वशास्त्राणां
प्रयोगार्थत्वेनप्रयोगरूपएकदेशस्थत्वेपिपरत्वादिकंसंगच्छते क्ङितिचेतिसूत्रस्थकैयटोक्तरीत्याविधिसू
त्राणांपरिभाषादेशेसन्निधानेपिपरत्वादिकंसंगच्छते। एवंचाकडारसूत्रस्थभपदादिसंज्ञासस्वेच्छाव्यव
हारएव। अतएवष्यङइतिसूत्रस्थभाष्यसंगतिः। अंशांतराप्रामाण्येनतस्यैकदेश्युक्तित्वेपिसर्वांशस्य
एकदेश्युक्तित्वेप्रमाणाभावात्। अतएवोद्योतपरिभाषेंदुशेखरादिभिर्नविरोधः। अन्यथावाहऊठसूत्र
स्थशेखरस्य अदसोमादित्यत्रोद्योतस्यैकदेशविकृतमनन्यवदितिव्याख्यानस्यपरिभाषेंदुशेखरस्यचा
संगतिःसोढव्यास्यात्। अत्रत्यग्रंथस्यसर्वस्यसिद्धांतितत्त्वेपिअंशांतरस्यसिद्धांतत्वमितिसूचयितुंके।
चिदित्याहुरित्युक्तं। एवंचसंज्ञापरिभाषाणामैकरूप्यमेवफलितं। एतावानेवविशेषः। ष्यङ्सूत्रभा।
ष्यादौइत्सूत्रभाष्याच्चसंज्ञाशास्त्राणांवाक्यैकवाक्यता। परिभाषाणांतुलाघवात्पदैकवाक्यतेति एतदेव
ध्वनयितुमाह अलमिति। अनुबंधपदार्थमाह। इत्संज्ञकाइति अनेनपूर्वसंगतिःसूचिता। अन्य

Shankari Tikka.

॥ श्री काशीजी में आदिविश्वेश्वर के पास महल्ला घुघुरानाशामा की गली श्री अनुबाबू
हरखचन्द्र जी के बाड़े में दुर्गाप्रसाद कटारे के गणेशयन्त्रालय में शांकरी टीका छापी गई।
जिस सादी ने ख्याल हुवे छापनेवाला घर विन जिस्को लेना होय उसे चांदनी चौक में दु
र्गाप्रसाद कटारे के दुकान पर मिलेगी॥ श्री शुभं॥ ❀ ॥

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No.
Date 6.8.68
SIMLA.

शांकरी
३

त्वस्याप्युपलक्षणत्वात्। अन्यथानेकमुदाहरणमिति न्यायेन नास्य तदुदाने ङित्त्वादित्येव वदेदिति भावः। शिङ्ग्र
हणं व्यर्थमिति। नन्वित्संज्ञालोपयोरंतरंगत्वेनात्र पक्षेप्यनुबंधविनिर्मुक्तपदार्थोपस्थितेः रैशादौ नानेका
ल्त्वमिति चेन्न। सूत्रोपात्तस्यैव स्थानित्वमिवादेशत्वमपि तस्यैवांगीकारादित्याशयात्। शिङ्ग्रहणेनानुब
न्धानामलूत्वव्यवहाराभावो ज्ञाप्यते तेनेयं फलितेति स्थानिवत्सूत्रे शेखरे। अत एव प्रदीव्येत्यादौ स्थानिवत्त्वा
त्किन्त्वात्कित्त्वातिदेशेन गुणाभावः एतेनापूर्वाचेयमित्यपास्तं। यद्यि तु नल्यपीति विशेषापेक्षज्ञापकमेवामित्यप्र
दीव्येत्यादिसिद्धिः। सूत्रोपात्तस्यान्यादेशत्वमपि फलाभावान्नांगीक्रियते। औशादावपि भूतपूर्वानेकाल्त्वा
देव सिद्धिः। शिशीडाणलादेरपि आनुपूर्व्यात् सिद्धिः श्रवणस्तु इत्यादौ तु गित्कार्यार्थं तथा नानेकाल्त्वाभावेदि
व उदित्यत्रतूच्चारणार्थत्वेन न दोषोऽन्यथा सामर्थ्यादमल्यत्वेपि तित्स्वरः स्यादिति ध्वनितं चेदमनेकाल्सूत्रे
भाष्ये। स्पष्टश्चायमर्थस्तत्रैव कैयटेऽनुभेद इत्युच्यते। तदेकान्तत्ववादिनापि नांगीकर्तव्यैषा शिङ्ग्रहणं च न कर्तव्यमे
वं चानेकाल्त्वात्सर्वादेशः श्यादेश इति प्रक्रियाग्रंथः परिभाषेंदुशेखरश्च स्वरसतउपपद्यते। लुटः प्रथमस्येति राम·
सूत्रभाष्यं तु सूत्ररीत्येति बोध्यं। किं चार्वणस्त्रित्यादौ ङकारानुबन्धकरणेपि निर्वाहोऽनङ्वत्। एतेन द्विब ३

॥ऋत उदित्यत्र त्तु॥ दादा इत्यस्य स्थादेत्तु॥

उदित्यत्रतुनकारोच्चारणस्य भाव्यमानोप्युकारः सवर्णान्गृह्णातीत्यर्थज्ञापनतया आवश्यकत्वेन तकारा
दुत्तरस्वेङ्कारकरणेन तस्येत्संज्ञालोपौ न स्यातामित्यपास्तं। नैकमुदाहरणमिति न्यायेन तत्प्रयोजनस्यैवा
भावात्। अदसोसेरित्यत्र उ इति समाहारेण निर्देशाच्च। असंदेहाय तत्रैव उकाल इतिवदू इति निर्देशेन
सर्वेष्टसिद्धेश्च परिभाषास्वीकारे सनाशंस इत्यादौ अतिप्रसंगाद्दुपधायोगो ह इति सूत्रभाष्याच्चेत्यन्यत्र
विस्तरः। अवदातं मुखमिति। आत्वे कृते पलोपेन त्वानुमानिकस्यान्यादेशभावेन दाप् इत्यस्य दा इत्यादेश
स्थानिवत्त्वेन दात्वं सुलभं पूर्वं पकारलोपे तु दैप् इत्यस्य निवृत्त्वेपि तत्र दात्वाभावादिति भावस्तदेवोपपा
दयति। पलोपोत्तरमात्वे कृते इति। उदीचां माङ इति। माङ् माने इति तु नेह गृह्यते ज्ञापकपरभाष्यप्रामा
ण्यादपूर्वकालार्थकत्वाभावस्य ततो नानभिधानात्। भाष्ये तु उपायान्तरप्रदर्शनेनास्यानावश्यकत्वं।
सूचितं। तथाहि। नायं दैप् किंतु दिवादिषु दाप् शोधने पठ्यते। दायतीत्यत्र स्वरे भेदस्तु नोभयथा ------ प्यंतोदा
त्तत्वात्। नाच्छौलिके चानुशिष्यमान इत्यत्रापि न स्वरभेदः श्यन्स्वरस्याद्युदात्तस्य सतिशिष्टत्वेऽन्यत्र वि
करणेभ्य इत्युक्तेर्न बलवत्त्वं। उभयथाप्यंतोदात्तस्यैव सत्त्वात्। प्रणिदापयतीत्यत्रादाविति प्रतिषेधाभावा
प् न च पलोपोत्तरमुपदेशत्वाभावात्कथमात्वमिति वाच्यं देदह्योरित्यत्र द इत्युपादानेनानुबंधलोपोत्तरमप्युपदेशत्वकल्प

शांकरी ४ यापिदितिन्यासोपिदर्शितः। दाधाध्वितिसूभाष्येउदीचांमाङ इत्यत्रतुकृतानुबंधलोपस्यमेङ आत्वेसोपलक्षि
तोच्चारणार्थोङकार इतितदाशयः। ददातिदध्यात्योरिति। वासरूपसूत्रेभाष्येतु उपायांतरप्रदर्शनमपि। त
त्रहिसूत्रेऽसारूप्यमौपदेशिकंप्रायोगिकंचेतिपक्षे औपदेशिकग्रहणेसरूपप्रत्ययेबाध्यबाधकभावेफ
लाभावेनासारूप्येएवतत्सत्त्वेनासरूपग्रहणानर्थक्यात् प्रायोगिकमिहगृह्यते। नचप्रायोगिकग्रहणेग्राम
णीःग्रामण्येइत्यत्रक्विपोऽदर्शनरूपत्वेनसरूपस्यैवाभावेनक्विवर्णेनस्यात्तामितिवाच्यं। असरूपइत्यस्य
सरूपाभावइत्यर्थेनादोषादित्युक्तमेवंचनात्रपक्षेवचनकर्त्तव्यताया आवश्यकत्वमस्ति। एतेन नानुबंध
कृतमसारूप्यमितितुकर्त्तव्यमेव। कारणोर्वाकार्यबोधोत्तरंप्रत्ययत्वज्ञानंतदुत्तरमित्संज्ञेतिबोध्यमित्य।
पास्तमितिमात्सर्यमुत्सार्यविचार्यमार्यैरितिदिक्। नन्वध्येताशयितेति। क्ङितिचेत्यत्रक्ङितीतिनिमित्तसप्त।
मीतिभावः। तन्निमित्तग्रहणंकर्त्तव्यमितिवार्त्तिकात्। भाष्यकृतोक्तेः किंत्वेनतत्सभाष्यवार्त्तिकप्रत्याख्यानाच्च।
अतएवभिन्नमित्यादौनगुणः तद्भावभावितामात्रेणेहनिमित्तत्वं। अतएवजेजैतुरित्यादिसिद्धिः। द्वित्वेतु। राम ४
तोनिमित्तत्वेऽनाचोपितत्सत्वात्। यद्यपिशयितेत्यत्रइकारस्यकार्यित्वेपिनशीङ इतिगुणनिषेधोदुर्वार।

चक्रतुर

थाविध्रियमाणपदस्यभावित्वेनपूर्वत्तद्धिवर्णासंगतिः। इत्संज्ञाप्रयुक्त लोपान्यभावाभावकार्यभाज
इतितुपरमार्थस्तेनोच्चारणार्थेष्वतिप्रसंगः विधेयैकदाप्यदर्शनादिति। ननूपस्थाप्येऽनवयवत्वं साध्य।
तेउक्तउपस्थापके नाद्यः हलंत्यमित्यत्रलक्षणायानिर्बीजत्वापत्तेः। नान्योपि। विधेयैकदाप्यदर्शनादितिहे।
तोरसंगत्यापत्तेः। नहिशरीरावयवस्यहस्तादेर्दृष्टस्याभावदर्शनेनानवयवत्वं शक्यतेवक्तुमितिचेन्न। प्रायोभ्या
मादौउपस्थापकेदृष्टस्यावयवस्योपस्थाप्येपिदर्शन वत्प्रकृतेतदभावेनतस्योपस्थापकानवयवत्व
मित्याशयात्। यद्यपित्रयाणांवचनरूपाणामकरणेनानवयवत्वमेवयुक्तं लाघवात्तथापिनहिवर्णा
भिव्यक्तिजनककंठाद्यभिघातगौरवमेवादर्त्तव्यमितिन्यायेनतत्रतन्त्रारोपरूपस्यज्ञानजनमनोव्यापा।
रगौरवस्यापिसत्वेनन्यायसिद्धावयवत्वस्यैवन्याय्यत्वाद्वचनत्रयावश्यकत्वस्यभाष्यतोलाभाच्चात्तत्रा
हावस्त्विति। नन्वेवंतन्मतेनुबंधानामेकांतत्वेपचतिभवतीत्यादौशपस्यनुदात्तेदितिस्वरानापत्तिः। अकारांतो
पदिश्यमानत्वाभावात्। भाष्येस्वरविधौतथैवसिद्धांतितत्वात्। अतएवहनोह यङ्लुगादौनानुदात्तत्वंसुञ्जका
रितव्यपदेशिवद्भावोवोध्यइतिचेन्नतानुबंधकृतमनेजंतत्वमितिपरिभाषायामनेजंतपदस्यानकारांत॥

शां.करी. ५ नाद्दोषात्। प्रकृतग्रंथस्तु प्राचामनुसारीति केचित्। ध्वनितैषेति। यद्यपि भाष्ये एतत्परिभाषाभावस्यैव ध्व
ननं। तथा हि जेघ्रीयते देध्मीयते इत्येतदज्ग्रहणव्यावर्त्यं। तत्र च कार्यातिदेशे तदानर्थक्याद्रूपातिदेशे ईघ्रा
ध्मोरिति लस्य निवृत्त्याऽनिष्टापत्तिरित्युक्तं। तत्राचनटभार्यावर्दांजनानि भवंतीति पाठ भाष्यसिद्धांताद्वितीयाज
वयवस्य द्वित्वे यकारो निमित्तत्वा नापत्या दोषाभावेन भाष्यासंगतिस्तथापि स्वरांतरे व्यंजनान्युत्तरस्येति प्राति।
शाख्यमनुसृत्योक्तं। अत्र पक्षे अरिरिषतीत्यत्रारिशब्दस्य द्वित्वेपीकारस्य सन्वयवत्वत्वाद्द्वित्वानुभवेन तन्नि
मित्तत्वाभावान्न दोष इति बोध्यं। एतेन कृतेप्यज्ग्रहणेऽरिरिषतीत्यादौ गुणस्य स्थानिवत्त्वेन इस्शब्दस्य द्वि
त्ववारणेनैषा ध्वनितेत्यपास्तं। सत्यसति च तस्मिंस्तत्र दोषस्य दुर्वारतया तस्याप्यज्ग्रहणव्यावर्त्याभावाद
ज्ग्रहणस्य किं व्यावर्त्यमिति प्रश्ने रिरिषतीत्युत्तरस्यायोग्यत्वाच्च। इत्थं ग्रंथकृदा कूतं। भाष्ये कार्यातिदेशे
चक्रतुरित्यादौ अनकाराभ्यासता प्राप्नोतीत्याशंक्याज्ग्रहणेन रूपातिदेशज्ञापितेउक्तदोषवारणं कृतं। अत्रे।
अधिजगे इत्यत्र इवर्णाभ्यासता प्राप्नोतीति रूपातिदेशो दूषणमभिधाय गाङ् लिटीति द्विलकारको निर्देशः। राम.
लिटि लकारादाविति उक्तं। एवं चाज्ग्रहणस्यैतदेव व्यावर्त्यमित्याशयः। एवं चाधिजगे इतिवदरिरिषतीत्य ५

त्रद्दोषानुषन्यासेनभगवतासाध्वनिनैवेतिसुधियोविभावयन्तु। आर्धधातुकीयाःसामान्येनभवन्तीतिप।
क्षेतद्भावभाविनामात्रेणोवतद्बुद्धिभाविनामात्रेणापिनिमित्तत्वमित्यंगीकारात्। अधिजगेइत्यस्यतज्ज्ञान
संबोध्यां। ईदृशनिमित्तत्वाश्रयणेलिंगत्वजुग्रहणमेवेत्यन्यत्रविस्तरः। ननुपूर्वंधातुरुपसर्गेणयुज्यतेप।
श्चात्साधनेनेतिसिद्धान्ताद्यथोद्देशेदाशब्देप्रवृत्तायाघुसंज्ञायाअवारणाण्णत्वसुलभेनचकार्यकालपक्षेदोष
एवनस्याद्धि अत्रपक्षेऽदसोमादितिसूत्रभाष्यप्रामाण्येनसंज्ञाशास्त्रस्यस्वदेशेवाक्यार्थाभावेनघुसंज्ञाया।
णत्वशास्त्रैकवाक्यत्वेनत्रिपादीस्थतयासिद्धत्वात्साधनकार्येकृतेदारूपाभावादितिवाच्यं। अदसोमादित्यत्रोक्त
रीत्यापरिभाषावत्संज्ञाशास्त्रस्यापिस्वदेशेवाक्यार्थस्यसत्त्वेनाष्टाध्यायीपाठकृतपरत्वाद्याश्रयणेनवानेरंगत्वा
द्घुसंज्ञायांकृतायांसाधनकार्येकृतेपिअत्रपक्षेणत्वंदुर्वारमितिचेन्न। पूर्वंधातुरुपसर्गेणोपसर्गार्थेनयुज्य
तेततःसाधनेनकारकेणकार्येणक्रियायाःसाध्यत्वेनसाधनाकांक्षत्वादित्यर्थस्यग्रंथकृदभिलषितत्वेनपूर्वंसा
धनकार्येकृतेदाप्रवृत्तस्यदारूपत्वाभावादवयवस्यानर्थक्येनचणत्वविधेयक्रियायुक्ताःप्रादयस्तंप्रत्ये
वगत्युपसर्गत्वमित्यर्थस्यसत्त्वेनदानिरूपितोपसर्गत्वाभावेनचत्वदुक्ताशंकायागस्त्यनुपक्षपातचूर्णितत्वात्।

शाक री. ६

नचैवमपिकार्यकालपक्षेओक्तोदोषोनरीत्यांतरंगायांघुसंज्ञायांकर्तव्यायांवहिरंगस्यपुकोसिद्धत्वादर्भोइत्या।
देशेप्लुतेह्रेतोऽनुनासिकप्रतिबंधकप्रगृह्यत्वावद्दापशब्देदाबुध्याप्रवृत्तयाघुसंज्ञयाणत्वंसुलभमेवेतिवाच्यं।ष्य
ङ्इतिसूत्रभाष्यप्रामाण्येनसंज्ञायावाक्यैकवाक्यत्वलाभेपिशतानीत्यत्रत्यशब्दस्लोकरीत्याषट्संज्ञासूत्र
स्यशेश्वरोक्तरीत्याक्तन्मेजेत्तइतिसूत्रस्यशेश्वरोक्तरीत्याचविधिनिमित्तनिमित्तकत्वस्यसंज्ञाशास्त्रस्यलाभे
नउपसर्गनिमित्तकत्वेनघुसंज्ञायामपिवहिरंगत्वस्यतुल्यत्वात्।अप्रधानेप्रधाननिमित्तकत्वस्यलोक।
सिद्धत्वेपिप्रधानस्यतन्निमित्तकत्वेमानाभावेनपरस्परंवहिरंगत्वखंडकग्रंथेननविरोधः।असिद्धपरिभा
षाज्ञापनपरभाष्यादिनायथानविरोधस्तथातत्रैवस्फुटीकरिष्यति।एवंचप्रकृतेसर्वथातदसिद्धिरेवानत्रा
हाननुप्रणिदापयतीति।अत्रादावितिप्रतिषेधस्तुनतेनहिवांतस्यप्रतिषेधेपिपांतस्याप्रतिषेधात्।सू
त्रेअदावितिचर्त्वेननिर्देशाद्इतिदाधाघ्वितिसूत्रेभाष्येस्पष्टं।लोकतस्तदर्थलाभेपितदनित्यत्वेनेव ते
ल्लाभोत् आहायमुद्दृश्येति।।अन्यथारेफस्योरेफेतिशास्त्रेणाकारावयवत्वबोधनेनावेवावयवत्वस्यसमुदायावयव राम. ६
त्वस्यलोकसिद्धत्वेनदावयवत्वस्यरेफसत्वेनप्रनिदारयतीत्यादौदोषः स्यादितिभावः।नचायंन्यायः।शास्त्रे

स्थाप्यर्थवत्वेनस्यान्यादेशभावइतिसिद्धांतात्समुदायेकार्यित्वलाभात्। अरिरिषतीत्यत्रेवावयवद्वारास
मुदायेतत्सत्वाच्च। ऊर्णुनविषतीत्यत्रतुसत्वेनस्योद्देश्यत्वेपितत्रेवात्रापिसमुदायद्वारावयवस्यप्राप्तकार्यि
त्ववारणायकार्यमनुभवन्निति। द्वित्वविधौहिसन्यङोरितिषष्ठीनतुसप्तमी। अन्यथाप्रतीषिषतीत्यत्रसनो
द्वित्वंनस्यादितिबोध्यं। यदितुक्ङितीत्यधिकरणसप्तमीकारकविभक्तेर्बलवत्वात्। क्रोः किर्त्वेनेकवर्णाव्य
वधानंसह्यमितिभिन्नमित्यादौनदोषः। द्विर्वचनेचीत्यत्रापिद्विरुच्यतेऽस्मिन्नितिव्युत्पत्त्याअरिरिषतीत्यत्रन।
दोषस्तत्रहिनह्यकारेपरेद्विरुच्यतेकिंतुतस्येवऊर्णुनविषतीत्यत्रतुइकारेपरेद्वित्वमुच्यतइतिभवत्येवस्यानि
वत्वमित्युच्यतेतन्नदोषानिष्फला। यद्येतदतिरिक्तफलंनेतीतिपरेवस्तुतइति। नन्ववयवावयविनोःसंबंधस्य
समवायत्वमित्यनुभवाल्लोकेनिमित्तकारणस्यदंडस्यसमवायिकारणमृत्तिकायाश्चभेदइतिशक्य
तेवक्तुं। शास्त्रेतथाश्रयणेमानाभावः। वर्णानांप्रसज्यप्रसंजगकभावसंबंधसत्वेपिअवयवावयवित्व।
स्याभावात्। नचशपितेत्यत्रशीत्येतत्समवेतगुणरूपकार्यसंपन्नेनिमित्तकारणस्यङित्वस्यशेइत्यत्रस
त्वेनतत्संभवइतिवाच्यं। एवमप्युच्येतेत्यादौनदंभवादितिचेन्न। शपितेरीतिज्ञापकमात्रसाध्यत्वे।

शांकरी· ७ दोपुनरुत्सर्गप्रवृत्तावपिनञ्कौंडिन्यन्यायेनबाधेनदप्रवृत्तेरंगीकारात्। अस्तिचप्रकृतेन्यायविषयताइत्या
दिशकृतेपिन्स्रानुमानिकस्यान्यादेशेनस्थानित्वेनमुकुप्रवृत्तेः सत्वात्।सवर्णदीर्घेतुनैवंतत्दुत्तरंमुक्तोच
रितार्थ्यात्। यत्तुमुक्तिकृतेनेयादेशोनइतिनपरकरणादिनितन्नपचमानइत्यत्रानुपदेशप्रयुक्तस्वरसा
धकपरभाष्यप्रामाण्येनयदागमेलब्धस्यानपरत्वेनव्यावृत्तेः। अविशेषाद्विशिष्टत्वातिदेशवन्मात्रि
कस्याप्यतिदेशाच्चेतिचेन्न।तावन्मात्रस्यप्रयोजनत्वे आतोङितइत्येनंतरेनानस्येत्येववदेत्। अर्धमा
त्रालाघवस्यउत्तरत्रईदासइत्यादौव्यत्ययकल्पनानावश्यकत्वस्यचसत्वात्।नन्वेवमपिमुग्विधाने
सफलंपचम् आनइत्यवस्थायांसानुनासिकनिरनुनासिकयोः स्थानेजायमानस्याकारस्यांतरतम्यादु
भयगुणकस्ययुगपत्संभवाभावेपिपूर्वपरयोः प्रत्येकंस्थानित्वापर्याप्ततास्यात्। अन्यथातुस्थानिगुण
कनिरनुनासिकएवस्यात्। नचामइत्यत्राक्ष्णातिदेशवत्कंठ्यत्वादिशास्त्रसत्वेपि ओदौतोः कंठ्यत्वओ
ष्ठ्यत्वयोरेकत्रदर्शनेनातिदिश्यमानधर्मविरुद्धधर्मत्वाभावेनमकारस्याश्रयस्यौष्ठ्यत्वस्यापिसत्वेनो राम·
भयांतरतम्याद्गुणापवादेनसवर्णदीर्घेणोभयगुणकयोरोकारौकारयोरेवप्राप्त्यापचौनःपचोनःपचौ ७

नःपचौनइतिरूपस्यसत्वान्नाकारःप्राप्तइतिवाच्यंनह्याविलुपलक्षणमेचः सर्वस्यानुनासिकस्यादर्श
नादितिशेखरौकारीस्याऽनुनासिकत्वाभावात्।भंजोन्त्रामर्दनेइत्यादौनयादर्शनेपिस्वराणामूष्मणांचैव
विवृतंकरणंस्मृतंइतिशिक्षोक्तेरौकारस्यविवृततमत्वप्रतीत्यातस्यचविवृतेनाकारेणसाम्याभावेपिईश
त्स्पृष्टस्यविवृततरौकारस्यप्राप्तावपिनैतावतानुगविधानसाफल्यंकेनचिदपगतमितिचेन्न।विधानस्ये
नावन्नयोजनत्वेमात्रालाघवेनप्रक्रियालाघवेनचव्यानस्यौइतिन्यासमेवपाणिनिःकुतोनाश्रिश्रिय
नृ।एवंचादेपरस्येत्यदे❀।नेनाकारस्यसानुनासिकेउकारेकृतेआद्गुणइत्यनेनसानुनासिकांतरतम्यात्सानुनासि
कौगुणः।निरनुनासिकांतरतम्यात्तादृशएवेतिपचोनः पाचौनइतित्वदभीष्टसिद्धमेवेतिकिमियताप्रया
सेनेतिरहस्यंविचार्यताम्।एतेनएचइगितिसूत्रभाष्येप्रदर्शितमूयसाव्यपदेशेनप्रक्षेपकल्पस्यानिनो
बाहुल्येनसवर्णआकारएवभविष्यतिनौकारादयइत्यपास्तं।एचोंतरतमहस्वाभावेनावयवांतरतमे
ननव्यवस्थापनेनियमप्रसक्त्याउत्तरभागबाहुल्येनव्यवस्थायाःसत्वेपिसंभवतिसमुदायांतरतम्येनद
शयणोमानाभावादनिष्टापत्तेश्च।अतएवखट्वाएडकाइत्यादौअवर्णभागबाहुल्येपिनाकारोदृष्टिरि।

शांकरी तिध्वनितश्चायमर्थः। तद्वर्णयोरादेशो वर्णाग्रनिपतितिरित्यादिना स्थानेंतरतमसूत्रशेषभाष्ये कैयटेन स्प।
८ ष्टमेवोक्तमिति दिक्। दिदीये इति सुड्विधानवैयर्थ्यं तु नलोपस्य पाक्षिकत्वेन तस्य यत्र यश्रवणार्थत्वात् ननु
नायं दोषः कुम्यटाविति निवार्तिकारंभात्। एरनेकाच इत्यनेन प्राप्तियोग्ये सुटोऽचारितार्थ्यात्। घनर्थेकविधानमि
तिकेनेकाचाभावेपि इयङः प्राप्तिसत्वादित्यरुचेराह। जह्रोरित्यादाविति। आदिना भूयास्तामित्यादौ आर्धधातु
कत्ववलादित्वयोरतिदेशेन प्राप्तस्येटः परिग्रहः श्रीणां सुभ्रूणामित्यादौ नुड्विशिष्टस्याजादित्वातिदेशेन ओः
सुपीति प्राप्तयणादेशस्य च प्रसंगो बोध्यः। ननु यमुद्दिश्य विहितइत्युक्तौ राधिषीष्टेत्यादौ सुटः सकारस्य प्रत्यया
वयवत्वाभावेन षत्वं न स्यात्। तकारोद्देशेन सुटो विधानात्। न च तकारप्रत्ययावयवत्वसत्त्वेन तदतिदेशेन ष।
त्वं सुलभमिति वाच्यं। उद्देश्यतावच्छेदकधर्मसमानाधिकरणधर्मस्य प्रत्ययावयवत्वस्य विशिष्टेतिदेशे।
पि सकारे तदभावादिति चेन्न। तन्मध्यपतितन्यायेन सीयुड्विशिष्टस्य प्रत्ययावयवत्वालाभेन सकारे तद।
वयवत्वासत्तेः ॐ। क्वचिद्विधावुद्देश्यविशेषणेनापि आगमविशिष्टा गृह्यंते। अत एव वक्तुवचनस्य वस्त।
सावित्यत्र पदस्य पदादित्यधिकारादुपस्थितसमर्थपरिभाषावाधाय पदत्वेन सुबंतत्वेन वा यत्र साक्षादु राम
द्देश्यता तत्रैवास्याः प्रवृत्तिरित्युक्तं समर्थसूत्रे शेखरे। विशेषणे उद्देश्यत्वाभावे तु साक्षादित्युक्तिरसंगता॥ ८

नाऽश्रियत इति वाच्यं। हलंतात्तदादेः परस्यापृक्तस्य हलो लोप इत्यर्थकहल्ङ्यादिसूत्रस्य सोमसुनित्या
दौ अनिष्टापत्तेः। कीर्गीरित्यादौ रेफस्यापदांतत्वेन विसर्गानापत्तेश्च सञ्ज्ञ भूरित्यत्र नकारस्यानुकपदांत।
त्वात् शशछोटीत्यनापत्तेश्च। अनरावधौ वि वी टामिति सूत्रे इट्ग्रहणं चरितार्थं। अन्यथा इकारस्य शास्त्रेणाप्र।
त्ययावयवत्वबोधनेपि अंगावयवत्वाबोधनेन गुणाप्रवृत्तौ तद्वैयर्थ्यं स्पष्टमेव। एतेन पठितेत्यादौ रावंस
तिङीवापत्तिरित्यपास्तं। अनुबंधविनिर्मुक्तपदार्थोपस्थितिरिति सिद्धांतादेकांतत्वपक्षेप्युपदेश एवेत्संज्ञालो
पाभ्यामपहारादृकारस्य कस्याप्यवयवत्वाभावेन दित्पदवाच्यत्वाभावात्। यत्रेत्संज्ञानुबंधानां तत्र प्रयोज
नाभावात्सामर्थ्यादुपस्थाप्येनत्कार्यानुमानेपि अन्यत्रापि तदनुमाने मानाभावाच्च। भवितेत्यादौ त्विकारस्य प्र
त्ययावयवे वृत्ति बोधितन्यायेन समुदायावयवत्वं सुलभमिति बोध्यं। यदुपदेशप्रयुक्तेत्संज्ञा स व्यवह्रियत इत्यादि
ना स्त्रीलिंगप्रकरणे शाब्दरत्ने स्पष्टं। एतेन ल्युट्ल्युलोष्टित्करणेन क्वचित्तदनाश्रयणमिति वदंतोपि परास्ता इ।
त्यलं। सुब्विधानसामर्थ्यादिति। ननु सवर्णदीर्घं बाधित्वाऽऽनोङित्तद् इति स्यात्। सुब्विधानेन तक्रकौंडिन्यन्यायेन
सोपि बाध्यते। नच हलंतेपि मुक्ति अनयास दुर्वारा वेति वाच्यं। सर्वथा निरवकाशत्वेन बाधे रमायामित्या।

शांकरी· मपि भाष्यासंगतिः। पाघ्रेति सूत्रे पा इति विशिष्टरूपोपादानसत्त्वेनोपस्थितार्थस्य शब्दं प्रति विशेषणत
९ यान्वयसंभवेनार्थवत्तः पाशब्दस्यादेशविधानेनागमसमभिव्याहारे विशिष्टस्यैवार्थवत्त्वेन च निर्दिश्य
मानपारूपस्यार्थवत्त्वाभावादिति चेन्न। आदेशविधावङ्गाधिकारसत्त्वेनार्थवत्पाशब्दानयदंगं तदवयव
स्य निर्दिश्यमानस्यादेश इत्यर्थस्य सत्त्वेन यदागमेति न्यायेन प्रकृते र्थवत्पाशब्दः स्त्र पा इति तदंतत्वम
पि व्यपदेशिवद्भावेन तत्सैव सत्त्वेन तदवयव पाशब्दे निर्दिश्यमानत्वा क्षतेरिति भाष्याशय इति बोध्यं। स्था।
न षष्ठीनिर्देशादिति। एवं च शब्दानित्यत्ववारणाय पठितवाक्यस्य लक्षणया समुदायादेशपरत्वेपि न श
क्यार्थत्याग इत्यत्र चः परस्मिन्नित्यादेर्नासंगतिरिति बोध्यं। ननु स्थानिवत्सूत्रेणानुमानिकस्यान्यादेशग्रह
णमित्युक्तं। तत्कथमिहोच्यते तस्य स्थानिवत्सूत्रे ग्रहणे न न दोष इत्यादेशग्रणसामर्थ्यादिति चेत्सामं प्रकृ
तेपीति चेन्न। हनो वध इति वदेरूरिति षष्ठीनिर्देशेनाष्टाध्यायीबोधितस्थान्यादेशभावसत्त्वेपि श्रौतस्थान्या।
देशभावे शब्दानां नित्यत्वानुपपत्याकल्प्यमानसमुदायादेशस्यादेशग्रहणे न ग्रहणेपि नेष्टशानामि राम·
ति बोध्यं। नन्वेवमुदस्यादित्यादाविति। यदागमेति न्यायेनोद्देश्यतावच्छेदकसमानाधिकरणयावद्धर्मा ९

स्यात्। तेन शेरते इत्यादौ रुड्विशिष्टस्य सार्वधातुकत्वात् शीङः सार्वधातुके गुण इति गुणः सिध्यति। वर्णग्रहणे
इति। नद्वृत्तिधर्मातिदेशो न रुघटितधर्मातिदेशश्चेत्यर्थः। अत एव रुड्झलन्त्य इति सूत्रे भाष्ये रुदिहीत्यादौ धित्वव्या
वृत्तये हलीत्यनुवर्त्य हलादेर्हेरिति व्याख्यातं अन्यथा नया हलादित्वातिदेशेन तदसंगतिः स्पष्टैव। अत ए
व भूयास्तामित्यादौ वलादित्वाभावेन नेडिति तेन न् हिदीये इत्यादौ हरीणांइत्यादौ युट्नुट्चयणादयो नेति
बोध्यं ङमंत इति। फलितार्थपरमिदं॥ सूत्रार्थस्तु ह्रस्वात्परस्य पदावयवस्य ङ मोङ मुड् जादौ पदे इति
बोध्यः। तेनाहृत्तिकरणे गौरवेणास्य भाष्यस्यैकदेशयुक्तित्वमिति परास्तं। पूर्वांतत्वकथनेनैकदेशयुक्ति
त्वमित्यन्यत्। यत्तु मिदचोंत्यादिति सूत्रस्थभाष्यविरोधेनैकदेशयुक्तित्वमस्येति। अत्र हि मितः परादि।
त्वे द्विषंतप इति अत्र मोनुस्वारो न स्यादपदांतत्वादित्युक्तं। आगमानामागमिधर्म्यवैशिष्ट्यबोधने हि।
तदसंगतिरिति तन्न युक्तिमत्। संयोगांतलोपेकृते ःनुस्वारस्य सुकरत्वेन तस्यैकदेशयुक्तित्वस्य न यापि व्या
प्यत्वात्। नन्वेवं कृतः सोर्थ उपेक्षित इति चेल्लोकानुभवविरोधात्। फलाभावाद्धरीणामित्यादौ नुटः सुत्वेन
नांतस्य पदत्वेन पदांतस्येति णत्वनिषेधप्रसंगत्यादौ षवाहुल्याच्चेति गृहाण। सिद्धांतासंगतिरिति। नन्वेवं

॥ ७ ॥ टिपणं नन्वपरनिमित्तत्वेनांतरङ्गत्वात्स्वरसिद्धिर्भवत्येव न च वारणपरिभाषयाप्रथामतोसुकाभाव्यमिति वाच्यम् त

त्वमिति तत्रैव तान्तीकारादित्यरुचेराह किंत्वेति ॥

त्वा: वहिरंगपरिभाषानित्यत्वमूलकत्वेन पत्रानि

शांकरी· स्तिचउदस्यादपिबदिसत्राद्यंनौटकित्ताविनिशास्त्रसहकारःसुपदइत्यत्रयेनविधिरितिसहकारस्य।वि
१० सर्जनीयस्यसइत्यत्रतुनदंतस्ययेनविधिरित्येनन्स हकारसत्वेपिविंदुद्वयस्यतदभावात्। यद्यपिस्वंरूपमि
तिसंकेतग्राहकैसत्वेनैतच्छास्त्रीयेत्यनुपपन्नंतथापिभाष्येतस्यप्रत्याख्यानात्। सत्वेपिनदतिरिक्तविशे।
षणोदोषाभावाच्च। ईदृशानिर्दिश्यमानत्वंग्रंथकृतोप्यभिमतमेव। अन्यथाव्यक्तिपक्षेशंकायाजातिपक्षे
णसमाधानासंगतिः। तत्र जातेर्निर्दिश्यमानत्वेतुल्ययुक्त्याप्यणुदित्सूत्रगृहीताष्टादशव्यक्तीनांनिर्दिश्यमा
नत्वसंभवात्। ज्ञापकाश्रयणासंगतिश्च। अंतरावरीङ्·रिङोर्ङि·त्वंसप्ताष्टार्थमितिवक्ष्यमाणग्रंथसंगतिः। अन्य
थातदोः॥ सःसाविन्यत्रानुवृत्तत्यदादीनामित्यस्यैवतद्विधावनुवृत्तांगस्येत्यस्यनिर्दिश्यमानत्वसंभवादंत्यादेश
त्वायतनस्यावश्यकत्वेनतदसंगतिः। ममतु अंगस्येत्यस्यैकतच्छास्त्रीयसंकेतितत्वेनतदंतसंचतथात्वेनत
त्संगतिस्स्यैष्टैव। नन्वेवमपिस्वपूर्वापरविरोधः। इयङुवङोर्ङित्ववङात्वादीनामपिनिर्दिष्टत्वादंत्यादेशत्वा
येत्यनेनधातोरप्येतच्छास्त्रसंकेतवत्वादितिचेन्न। ग्रंथस्यान्याभिप्रेतकत्वात्। तथाहि। धातोरादिःधात्वादि राम·
। धातुरादिर्ययोरित्यतद्गुणसंविज्ञानोबहुव्रीहिः धात्वादिश्च धात्वादीच धात्वादयः तेषामितिषष्ठीतत्पु १०

रूपवहुव्रीहिगर्भैकशेषेण श्नुभ्रूश्रीणां निर्दिश्यमानत्वादित्यादेशत्वायेत्याशयात्। इदं तु धात्वादीनामिति।
वदेनासूचितमितिबोध्यं। अत एवानेमुगिति मुग्विधानस्य यदागमेतिन्यायानित्यत्वज्ञापकत्वं संगच्छते।
अन्यथा यदागमेति लब्धस्य उक्तरूपनिर्दिश्यमानत्वाभावेन तदसंगतिः। अत एव च येन विधिरित्यत्र भा
ष्ये प्रत्ययग्रहणे चापंचम्या इत्यस्य हृषनीरोड् इत्युदाहरणं संगच्छते इति दिक्। अनया परिभाषयेति। येन
विधिरित्यस्यैव यदागमेत्यस्यापि संज्ञात्वबोधकत्वेनोक्तरूपनिर्दिश्यमानत्वेन तयोर्नास्तीति भावः। लोके ना
ष्यंगाधिक्ये संज्ञासंज्ञिभावस्यैव बोधनात्। न चैतच्छास्त्रीयसंकेताभावात्तस्य तत्त्वं सुलभमिति वाच्यं। आद्यं
तौ टकितावित्यादिना संज्ञासंज्ञिभावस्यैव लाभात्। अत एव ऋकारस्य गुणवृद्धी अरारावेवेति संगच्छते। अ
तिदेशस्य तु तथात्वाभावेन तद्बोधितस्य निर्दिश्यमानत्वमेव। अत एवोक्तनिसृणामिति भाष्यसंगतिः। लिंग
विशिष्टपरिभाषायामप्यतिदेशत्वेन तद्बोधितस्यापि निर्दिश्यमानत्वमेव। अत एव सखीसुपथीत्यादि
विभक्तौ लिंगविशिष्टाग्रहणमिति परिभाषोदाहरणं भाष्ये संगच्छते। अत एव महतीप्रियायस्येति वहुव्री
हौ लिंगविशिष्टपरिभाषयां महन्त इत्यात्वमाशंक्यानित्यत्वेन समाहितं भाष्ये। नन्वेवं नदोः सस्रावित्यत्र

भाष्यशेखराद्यसंगतिः। नत्रहिनोरितिनोक्तमनेषेत्यादौनस्याप्यपत्तेरित्युक्तमतिस्यइत्यादौतद्वारणायपरिभा
षाप्रवृत्तेरावश्यकत्तयायदागमेतिन्यायबोधितस्यानित्यस्याप्यनयावाधादितिचेन्न। विरोधाभावात्। निर्दिश्य
मानत्वदाद्यवयवत्वस्यनकारेसत्वेनदोषप्रौव्यात्। उदस्यादित्यत्रतुनि र्दिश्यमानस्योदः परत्वाभावेनततः।
परस्यनिर्दिश्यमानत्वाभावेनचविरोधःस्पष्टएवेतिबोध्यं। एवंचतन्मध्यपतितन्यायबोधितस्यानित्यस्यापिने
यंबाधिकात्तस्यस्थानिवद्भावतुल्यत्वात्। नचयदागमेत्यनेनास्यभेदाभावेनस्थानिबुध्याकार्यजननादित्यसो।
भयत्राविशिष्टत्वेनकथमेतदितिवाच्यं। कादेशःखल्ववश्यंवाच्यःसाकच्कार्थः। अशवचनंसाकच्कार्थमित्या
दिभाष्यादस्यन्यायस्यातिदेशत्वलाभाद्यदागमेतितूदस्यादितिनिर्दिश्यमानस्येत्यस्योदाहरणदानात्संज्ञाबोध
कइतिलाभे नचतयोर्भेदस्यवालैरपिसुज्ञेयत्वात्। अतएवजरायाइतिसूत्रशेखरः संगच्छते। नचोक्तभाष्याद
व्ययसर्वनाम्नामित्यकच्विषयेनिर्दिश्यमानस्येत्यस्यप्रवृत्तिरेवास्तु। अतएवकिमःकइतिसूत्रशेखरोपपा।
दितभिन्धकीत्यत्रभाष्यविरोधोनेतिवाच्यं। न्यायसिद्धोक्तभाष्याभ्यामेतद्भाष्यस्यैकदेशयुक्तित्वात्। अकचिक्र।
तेधित्वनप्राप्नोतीतिभाष्यस्यतन्मध्येतिन्यायेनाकज्विशिष्टस्यधित्वेऽकचःश्रवणंनप्राप्नोतीत्याशयमजान।

श्रतिदिश्यंते। तेनात्रस्यात्वमुपपन्नं श्रत्र चेदंभाष्यंमानमितिबोध्यं। अतिस्यइत्यादिभाष्योदाहरणादध्याहृ
तनिर्दिश्यमानपदेलक्षणया अर्थद्वयमित्याह श्रवयवरूपमेवेति। यद्यप्यतिस्यइत्यात्रांन्यथाधेःत्वसदे
शास्येत्येवसिद्धं। तत्रैतराव्यवधानंचज्ञापकस्यसजातीयविषयत्वादजैव्यवधाने। अतएवहंसशिरांसी।
त्यादौ नदोषैस्तथापिश्रतिपूयमित्यादौ श्वोधोविद्वषीत्यादौचद्वितीयार्थस्यफलंबोध्यं। निरूपितत्वस्यतृतीयार्थ
त्वादाह। स्या नेनिरूपितेइति। स चनिवर्त्यनिवर्तकभावोयथैकोयणाचीत्यादौतत्रचैकोनिवर्तकोयणभव
तिप्रसंगेसतीत्यर्थःस चार्थात्तस्यैवेतिबोध्यं। जातिपक्षेदोषाभावादिति। नन्विदमयुक्तंजातेः स्वतोनिर्दिश्यमा
नत्वाभावेनव्यक्तेरुच्चारणावश्यकत्वेनोक्तनिर्दिश्यमानत्वस्यतत्राभावादितिचेत्। श्रस्यायंभावः। निर्दिश्य
मानत्वंनोच्चार्यमाणसजातीयत्वंवक्ष्यमाणहयवरट्सूत्रभाष्यविरोधात्। नाप्युच्चार्यमाणपदबोध्यत्वंतत्वे।
उच्चार्यमाणस्यस्यापाबोध्यत्वस्यागमविशिष्टेसत्वेनउदस्थादपिवदित्याद्युदाहरणपरभाष्यविरोधात्। येनवि
धिरितिशास्त्रमामाराये नविशेषणस्यतदंतबोधकत्वेनोच्चार्यमाणविसर्जनीयपदबोध्यत्वस्यतदंतेसत्वे
नोक्तभाष्यविरोधापत्तेश्च। तस्मादेतच्छास्त्रीयसंकेतग्राहकासहरिणोच्चार्यमाणपदबोध्यत्वंतदितिवाच्यं। श्र
॥४टिप्पणं तत्रहिविसर्जनीयांतस्यपदस्यसत्वमित्यर्थेनिर्दिश्यमानपरिभाषयाविसर्गस्यैवस्थानेसत्वमित्युक्तमुक्तथमुच्चार्यमाणविसर्ज्ज

इत्यस्यसंकेतत्वान्निर्दिश्यमानत्वाभावादंतरंगप्रवृत्त्युत्तरंवहिरंगप्रवृत्तौवाधकाभावाच्च।अकज्विषयेइति।
अत्रयद्वक्तव्यंतदुक्तंप्राक्।तमवग्रहणमेवेति।नन्वनेकविधांतर्यभावेपिस्थानकृतांतर्यस्यसत्त्वेनतत्रैवातिश
यत्वलाभार्थंतमवग्रहणंतत्वंचान्यूनानतिरिक्तस्थानित्वंतेनहरीणामित्यादौएदैतौनलाकृतिरित्यादौवकारे
यणानेतिचेन्न।तदभावेहिपूर्वसूत्रेस्थानेग्रहणानुवृत्त्याप्रसंगेसदृशोभवतीत्यर्थेसंपन्नेस्थानेइत्युत्तरसूत्रसा
मर्थ्यादेवातिशयत्वलाभेनतमवग्रहणस्योक्तार्थतात्पर्यकत्वसत्त्वात्।तेनह्यनेकविधांतर्यलाभप्रसंगस्थानेनैवां
तरेभवतिसतिसंभवइत्यर्थेजातेतमवग्रहणस्यातिशयत्वलाभार्थत्वमित्यन्यदितिवोध्यं।समानवर्णापादादीनां
तइति।तेनचरणशब्दस्यपदादेशोनेतिभावः।यद्यपिचरणपदशब्दयोःपर्यायत्वतयास्थान्यादेशत्वसत्त्वेपिन
दोषस्तथापिपदंघ्रिश्चरणोस्त्रियामितिकोशेनचरणशब्दस्यनपुंसकत्वलाभेनतत्स्थानेतत्समानार्थक।
पदादेशेशासितुमिपदीत्यस्याप्यापत्तेः।ननुपद्दन्नितिसूत्रस्यनस्थान्यादेशवोधकत्वंकिंतुव्यवस्थार्थत्वं।
किंचस्थानेतरतमे॥इतिसप्तम्यंतपाठस्यभाष्येदूषितत्वेनविसदृशादेशनिवृत्तिमात्रार्थकत्वेपितादृशस्था
निनिवृत्त्यर्थकत्वाभावेननेदमुदाहरणमित्यस्वरसादाह।तृज्वत्क्रोष्टुरितिचेति।नन्वेवमपीति।अर्थवद्ग्रहण

परिभाषया सर्वथानर्थकस्य वारणेऽपीत्यर्थः ॥ आन्महतः । महान्भूतः महद्भूतः च्व्यंतस्योर्यादिच्विडाचश्चेत्यनेन गतित्वे कुग-
तिप्रादय इति समासः गौणार्थबोधकत्वेन शब्दस्यापि न तत्त्वं बोध्यं । संज्ञादिरिति । अत्र कर्मधारयान्तस्योपसर्गइत्यङ्गआदि-
नामनुकरणपरिसंग्रहः । यद्वा संज्ञा आदिः प्रथमबोधविषयस्य स संज्ञीत्यर्थः । अत्र पक्षेऽपि अनुकरणसमुच्चायको बोध्यः
महान्तौ बाहू यस्य स महाबाहुरित्यत्राचार्योपसर्जनत्वरूपगौणत्वस्याग्रहणमावश्यकं । अत एव समानाधिकरणोत्तर-
पदे आत्वविधानं सफलमुपसर्जनप्रतिषेधश्च । एवं चेदं प्रयोजनं नासाधारणपदकार्यविषयत्वस्येति हृदि निधाया-
ह । किंचेति । यत्तु पदोद्देश्यकं कार्यमेव तत्कार्यमिति तन्न आन्महत इत्यत्रोत्तरपदाधिकारेण तेन पूर्वपदाक्षेपेण यथा-
कथंचित्तत्त्वसत्त्वेऽपि राजश्वशुराद्यदित्यादि तद्धितविधौ सुबंतात्तद्धित इत्यस्य सत्त्वेऽपि स्वमते घकालतनेषु इति ज्ञापकादु-
ह्यमानः प्रातिपदिकात्प्रत्ययः स्वपः परस्तात् । एवं च गर्गादिभ्यो यञित्यादेर्न लक्षणोत्यर्थसत्त्वेन तद्धितानां पदोद्देश्यक-
त्वाभावेन श्वाशुरिरित्यादौ यदापत्तेः । गोमवदित्यादौ प्रगृह्यत्वापत्तेश्च । नापि पदसंबंधित्वं तत्त्वं श्वाशुरिरित्यादावत-
इञो नापत्तेः । तद्वती तत्र त्वाद्यादेशानापत्तेश्च । तस्माद्वस्तुतः पदव्यपदेशरहितनिमित्तत्वं तत्त्वं तद्धितविधौ प्रातिप-
दिकाधिकारस्य सत्त्वेऽपि वस्तुतः पदव्यपदेशरहितनिमित्तकत्वसत्त्वात् । न चैवं प्रत्ययोत्तरपदयोश्चेत्यस्यापि पद-

शांकरी० कार्यत्वापत्तिः। तथा चत्वद्रुवतीत्यत्र त्वाद्यादेशो न स्यादिति वाच्यं। उत्तरपदे परव्यपदेशनिमित्तकत्वेपि च्विप्रत्य
१३ यादौ वस्तुतः परव्यपदेशरहितानिमित्तकत्वाभावात्। अतएव नत्रनूद्वयोपादानं। त्वद्भवतीत्यादौ च्विप्रत्यये
स्यादिष्विति पदत्वसत्त्वेपि सुबंतत्वाभावात्। सुप्तिङं तमिह पदत्वं विवक्षितं। तत्व परस्याप्रयोगे णोत्वादिनाग्रं
थकृतैव ध्वनितं। यद्यपि राजश्वशुरादित्यादौ उपजनिष्यमाणनिमित्तोप्यपवाद इति न्यायेन प्रकल्प्येति न्याये।
न च भविषयत्वेन पदत्वबाध इत्युच्यते नतरां परव्यपदेश इत्युक्त्वा सुबंतव्यपदेश इति पाठो बोध्यः। उपा।
तमित्यादीति। एतेन विशेषणात्र यस्यापीदमेवं कृत्यमिति ध्वनितं। तथाहि। यदुपात्तमत इति न तद्विशिष्टरूपं।
यद्विशिष्टरूपं प्रातिपदिकादि न तद्विशिष्यार्थोपस्थापकं यद्विशिष्टार्थोपस्थापकं श्वशुर इति न तदुपात्तमिति
ध्वनितं। नन्वेवमोत्सूत्रस्य भाष्यासंगतिः। तत्रह्यदो भवद्भो भवदित्यादौ प्रगृह्यत्वं गौणत्वेन परिहृतं। निपातपद।
स्य प्रातिपदिकतुल्यत्वादत आह। निपातपदं त्विति। निपतंत्याख्यातार्थं प्रति विशेषणीभवंतीति व्युत्पत्त्या निपात।
पदस्य चादिषु योगरूढत्वमिति भावः। प्रातिपदिकपदं तु शुद्धरूढमिति वैषम्यं बोध्यं। वस्तुतस्तु स्वरानुगतव्यक्ति। राम०
कानां संज्ञानां व्यक्तिरेव प्रवृत्तिनिमित्तं। डित्यादिषु व्यक्तिरेव तत्प्रत्ययार्थ इति न डित्थत्वडित्थयोर्भेदः। क्वादिसंज्ञा १३

नापरत्वाद्द्वित्वमिति समाधानमेकदेशिनोक्तं। अत एव भाष्ये ऽथवा हकारस्यैतद् शक्तिजेनेकारेण निर्देशाद् इ।
त्युक्ताशयेन समाधानं कृतं। तत्र त्यशेश्वरस्तु हल्ङ्ल्य इति सूत्रस्थकैयटानुरोधेनेति केचित्। एतेनाकच्विष
येनायंन्याय इति प्रतीकमुपादाय किमः कादेशे कर्तव्ये इति शेष इति वदंतः परास्ताः। उक्तभाष्यद्वयविरोधा
त्प्रपर्यंतं स्यकिमूयुवकाभ्यामिति प्रक्रियाग्रंथविरोधाच्च। एतेनाकच्विषयेनायंन्यायः स्यानिवृत्तावेव तन्मध्य
पतितन्यायेनापि तत्वुद्ध्येव कार्यजननादिति वक्ष्यमाणग्रंथोपि इहैव व्याख्यातः इत्यलं। विरोधाभावादिति।
राज्ञः कचेत्यादौ निर्दिश्यमानराजन्शब्दांतस्य कादेशो भवतीत्यादिना समावेशसंभवादिति भावः। यद्यपि सत्य
पि संभवे बाधनं भवतीति भाष्यनये विरोधेपि बाधसंभवः। तथाप्यबाधेनैवोपपत्तौ बाधोनन्याय्य इति भावः। य
त्यादेः परस्येति। सुपद इति भाष्योदाहरणादनेकालिति विषये ऽस्याश्चारितार्थ्येन परत्वादाभ्यां बाधः स्यादि।
ति भावः। नापीति। निर्दिश्यमानेत्यस्य षष्ठीस्थाने इत्येतदर्थभूतत्वेन वाक्यार्थबोधात्पूर्वं प्रवृत्तस्यांतरंगत्वेन स्वरात
योस्तु स्थानषष्ठीनिर्णयोत्तरं प्रवृत्त्या बहिरंगत्वमिति भावः। कैयट इति। अत्रारुचिबीजं तु अनयोर्निर्विषयत्वा।
भावः। हरीणामित्यादौ दीर्घस्यांत्यादेशत्वाय अलोंत्यस्येति चरितार्थ्यं। नामीत्यादौ ह्रस्वस्य गुणाद्यपि बोध्यं च।

न्यत्रतुपदसंस्कारपक्षेपि दोषोबोध्यः। एतत्सर्वं वक्तुंतत्पूर्वमेव तथा वोध इत्यभिप्रेत्य वस्तुतः स एवनेत्याह। किंचेति॥ क
र्तृक्रियेचानिर्दिष्टाविति पाठः। पुमान्स्त्रियेत्येकशेषात्। अत एव भाष्येपि तथैव पाठः। गामेवेत्यस्य तत्पद वाच्यमेवेत्यर्थः
।भाष्यस्यानुकरणमिदम न्यथा गोरेवेति वदेत्॥ एवं चाग्रे देवदत्तैवेति पाठः भाष्ये संबुद्ध्यंतस्य तस्य दर्शनात्। स्तुत
त्वं तु न वाक्यांतत्वाभावात्। भाष्येपि गामभ्याज देवदत्त शुक्लामिति पाठे न तस्य वाक्यांतत्वाभावाच्चेति बोध्यं। श्लोक
इति। अभिव्यक्तपदार्थायेस्वतंत्रालोक विश्रुतां शास्त्रार्थंस्ते कर्तव्यं शब्देषु न तदुक्तिष्वित्यर्थः। आरभतेतिक्वाचि
त्कोपपाठः आरभमाणोनेति पाठः। तस्यात्मनेपदित्वात्। नन्वेवमोन्सूत्रस्थभाष्यासंगतिरेवोक्तरीत्यान्यायस्य पद
कार्यविषयत्वलाभेन तथैव वक्तव्ये ऽन्यथा समाधिकरणानंमनुचितमतस्तु तद्विशिष्टरूपोपादानविषयत्वमितो लभ्यत इत्या
हाआर्थाश्रय इत्यादि। एवंच न्यायस्य पदकार्यविषयत्वं स्पष्टमेवोक्तमिति भावः। त्वयापि मदुक्तरीत्यैव वदेदं भाष्ये।
व्याख्येयमित्याह। गोतइति। एवं च त्वदुक्तविशिष्टरूपोपादानसाधकमिदं नेति भावः। तस्मात्स्वबंतव्यपदेशर
हितानिमित्तके कार्ये यत्र विशिष्यार्थोपस्थापकमुपात्तं विशिष्टरूपं तत्रैवायं न्यायसिद्ध इति बोध्यं। नन्वेवं मगोमती गोमती सं
पन्नगोमतीभूता इति प्रत्ययलोपसूत्रभाष्यप्रयोगे स्त्रियाः पुंवदित्यस्याप्राप्तिः। अमहती महती संपन्ना इत्यत्रे

वत्त्वविशिष्टस्योपादानाभावात्। एवंचास्य न्यायस्य प्रवृत्तिरितिचेन्न॥ गोमतीत्यस्य नदीत्यर्थेनाभाषितपुंस्कत्वेनादो।
षात्। स्पष्टंचेदं प्रत्ययलोप इत्यत्र विवरणे। यद्यपि तत्र कैयटेन श्रंते क्वचिद्विकृतेः कर्तृत्वं क्वचित्प्रकृतेरेवंच गोम
तीसंपन्ना इत्यत्र प्रकृतेः कर्तृत्वेन विकृतेः गोमतीत्यस्य भूतेत्यनेन वैयधिकरण्यान्न पुंवत्त्वं महद्भूत इत्यत्र तु वि
कृतेः कर्तृत्वेनास्ति सामानाधिकरण्यमिति समाहितं तथापि गोमतीत्यस्यारोपणेऽत्र गोमतीत्यर्थकत्वेन सा
मानाधिकरण्यस्य सत्त्वादिति विवरणे न दूषितत्वादिति दिक्। सुपथ्याः सुश्रोता इत्यादाविति। सुधीभ्यां तु दृचे
त्योणादिको सिः। आगमसमभिव्याहारे विशिष्टस्यैवार्थवत्त्वनियमेनासोऽत्रानर्थकत्वमिति भावः। ननु नेदं यु
क्तं। अवयवानर्थकत्वेपि विशिष्टस्य तद्ग्रहणेन ग्रहणान्नानर्थकत्वं। नच निर्दिश्यमानस्यावयवषष्ठ्यामपि प्र
वृत्त्या निर्दिश्यमानासंतस्योपधाया दीर्घ इत्यर्थसत्त्वेन प्रकृते निर्दिश्यमानत्वस्त्वनर्थकत्वेति वाच्यं। अपि।
वदित्यादावनर्थकेपि वाद्यादेशकरणेन निर्दिश्यमानस्यार्थवतो ग्रहणे मानाभावात्। एवमत्र उणादीनामव्यु
त्पन्नतया सुश्रोतसित्यव्युत्पन्नमेवेत्यभिप्रायान्न वक्तुं शक्यः। सुपथ्या इत्यस्यार्थवतस्तस्योदाहरणस्य क्रमे रुश्मृंगा
रूढत्वापत्तेरिति चेन्न। सुश्रोतसित्यस्य नसिप्रत्ययान्तत्वेनादोषात्। भाष्येपीदमेवोदाहरणं द्रष्टव्यं। यद्यपि।

॥ ८ ॥ निसूत्रे शेखरे इति तत्त्वं बोध्यम् अस्यानित्यत्वमूलकत्वं वदन्नेव विभाषेट इत्यु ॥ ८ ॥
भाष्ये ढ्डीवागमोऽप्येवोपात्तं तथापि तदुपलक्षणतयैव व्याख्येयं। अन्यथा तत्र सोचेतिदीर्घस्य सत्वेन नियमस्यानुपयु
क्तत्वेन च तदसंगतिः स्पष्टैवेति दिक्। अंगादिति परे इति। परे इत्यनेनारुचिः सूचिता। तद्बीजं तु विभाषेट इत्यत्रार्थव
त एव षीध्वमः संभवो नानर्थकस्येत्यंगादित्यस्यानर्थकत्वरूपे तत्र हीट इति न षीध्वम् विशेषणमसंभवात्। इद्दोवय
वत्वेन विशिष्टे षीध्वन्तम् सत्वेपि तद्दहितत्वाभावेन तत्वस्य दुरुपपादत्वात्। किंतु धकारविशेषणं। येन नाव्यवधा
नन्यायेन षीशब्दव्यवधानेपि भवति वचनसामर्थ्यात्। इणः परो य इट् ततः परस्येत्तत्संबंधि धकारस्य ढो भवती
त्यर्थः। एवं च तत्राप्यर्थवत एव संभवेनांगग्रहणसोक्तार्थबोधकत्वं सुक्तमेव। परं तु अर्थवद्ग्रहण इत्यस्य तेनानि
त्यत्वबोधनेपि अनिनस्मन्नित्यस्य न तन्मूलकत्वं भाष्ये वचनरूपेणैव तस्य पाठात्। स्पष्टश्चायमर्थः। विभाषेट इ
त्यत्रानर्थकस्यैव तस्य संभवेनात्रापि तथा भ्रमः स्यादिति कर्त्तव्यं त्वयांगादिति। मम तु नावश्यकं तदिति ग्रंथ
कटाक्षो बोध्य इत्यलं। तावन्मात्रांशे स्वरितत्वप्रतिज्ञाबललभ्यमिति। अनेनोभयत्र इदमेव बीजमिति सूचितं। य
द्यपि अर्थाधिकारशब्दाधिकारावेवानयोर्बीजमिति कैयटेनोक्तं तथापि पक्षान्तैरिति सूत्रे भाष्ये कथं पुनरेकयोगनि
र्दिष्टयोरेकदेशोनुवर्तते एकदेशोनेत्युक्तं। एकसूत्रनिर्दिष्टानां पदानामप्युपदेशेऽजनुनासिक इत्यनोनुवृत्तिदर्श

नामपि व्यक्तिरेव तत्र अनुगतानां नासां तच्छब्द एव। एवं च निपातनसंज्ञाया अनुगतव्यक्तित्वेन व्यक्तिरेव प्रवृत्तिनिमि
त्तमिति चादित्वेन चादीनामुपस्थितिः। प्रातिपदिकशब्दस्य तु शब्द एव प्रवृत्तेर्निमित्तमिति प्रातिपदिकपदवत्त्वेनो
पस्थितिरित्युक्तमनयोर्वैषम्यं। ध्वनितं चेदं वैषम्यं कुत्वं कस्मान्न भवति भत्वादित्यादिना हट्ठिसूत्रे भाष्ये स्पष्टं चे
दं कल्लक्सूत्रे विवरणे। संज्ञाशब्दस्वरूपं वा प्रत्ययैस्त्वतलादिभिरित्युक्तिस्त्वननुगतविषयालक्षणायां तथान्याल्प
नपरकैयटस्तु चिन्त्य एव। कुत्वं नेत्यस्य ककारो नेत्यर्थस्तु प्रकृताभिप्रायेण। तत्रानर्थत्वान्नस्यैव प्राप्तेः। एवं च ण
त्वं प्राप्तमित्यादावपि लक्षणां विनैव स्वरसतो निर्वाह इत्यलं। ननु नायं न्यायः पदकार्यविषयः किन्तु विशिष्टरूपो
पादानविषयोऽन्यथा गां वाहीकमानयेत्यादौ त्वदुक्तहेतोः सत्त्वेनात्वादिप्रवृत्तावपि गां पाठयेत्यादौ पाठनक्रि
यान्वयाय विभक्त्युत्पत्तेः प्रागेव गोणत्वप्रतीत्या उक्तहेतोस्तत्राभावेन चात्वादि न स्यान्मम तु विशिष्टरूपोपादा
नाभावान्न दोष इति कौस्तुभोक्तं युक्तमित्याह। गां पाठयेत्यादाविति। ननु वाहीकाणां पद एव प्रतीतावपि वक्तॄणां तु ततः पू
र्वमेव प्रतीतिसत्त्वेन विनिगमनाविरहो तत्राह। भाष्यप्रयोगेत्वाद्यादेशकरणे न चेति। सांतेति दीर्घस्यादिशब्दार्थः॥
क्वचित्तथैव पाठः। तदनापत्तिरिति। अत्वं संपद्यते। अमहान्महान्भूत इत्येतेषु त्वाद्यनापत्तिरित्यर्थः। त्वद्भवती।

पकं ज्ञापितेपि चारितार्थ्याभावात्॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ईकारस्याकारे वहोर्लोप इत्यतो
लोप इत्यनुवर्त्याथीकारस्य निवृत्तौ वकारविधानसामर्थ्यादेव पररूपं बाधित्वा दीर्घो भविष्यतीति चेन्न। अंगवृत्तपरि
भाषायाः सिद्धांतेऽसत्वेनाकृतस्रावेतिदीर्घव्यावृत्त्याकारस्य चारितार्थ्येनापवादत्वेन दीर्घं बाधित्वा पररूपापत्तेरि
त्याशयात् दिव उदितीति। नन्वेवं चारितार्थ्याभावादज्ञापकमिदं त्वर्धमात्रिकव्यंजनस्यैषत्सादृश्येनैकमात्रि।
कोकारेपि दीर्घस्याप्राप्तेः। न च व्रश्चेति सूत्रे कुग्रहणाकरणेलाघवेन कोरित्यत्र कृतीत्यननुवृत्तौ घुभ्यामित्यादा
वूठि ह्रस्वश्रवणार्थं नित्यत्वात्पूर्वं दिव उत्वं तु नस्यांगत्वात्तस्यैव प्राप्तेरिति वाच्यं। प्रतिपदविधित्वेन शीघ्रोपस्थि
त्या दिव इत्येव स्यादिति चेन्न॥ उत्वेपि वकारस्य तथात्वेनोभयोः समत्वादित्याशयात्। पक्षद्वयसाधारणमपि नद
सीत्याह। क्रत उदितीति। न च तपरत्वं द्वलोप इति दीर्घबाधनार्थमिति वाच्यं। सुपत्रराजिताविणः

ज्वलिताइव पन्नगाः। नैर्ऋतोऽस्य सभा संतप्तसवितुः रश्मयो यथेति रामायणप्रयोगविरोधात्।
उरण्रपर इति सूत्रे। णूग्रहणाभावे उरपर इति भाष्यविरोधाच्च स्पष्टं चेदं तत्रैव शेखरे। धर्मिग्राहकमानाददेश
विषय इयं तेन सनाशंसतनादिष्वज्भ्य इत्यादौ न दोषः। यद्यपि दीर्घणार्थस्याभिधानेनास्ति सिद्धानामेव शब्द

नामन्वाख्यानमित्यणुदित्सूत्रभाष्याच्च दोषस्तथापि लक्ष्यैकचक्षुष्कानस्मान्प्रति प्रवृत्तं शास्त्रमिति बोध्यं। नन्वेव
मूदुपधाया गोह इत्यत्र दीर्घनिर्देशो व्यर्थः। उदुपधाया गोह इत्यनेनैवेष्टसिद्धिरिति चेन्न। दोषो णावित्यत्रेत दनुष्ट।
नावांतरतम्याद्दूषयतीत्यत्र द्विमात्रसिद्धये दोषइ निविकृतनिर्देशस्य कर्तव्यतापत्तेस्तत्प्रत्याख्यानपरभाष्यासंग
तेश्चा। न च दुष इत्युक्तावपि गुणे द्विमात्रसिद्धौ उ कर्तव्यतेति वाच्यं। तत्र कौंडिन्यन्यायेन तदुत्तरं चारितार्थ्येन उत्वेन गुण
बाधापत्त्या दुषयतीत्यनिष्टापत्तेः। न च वैयर्थ्यं गुणबाधेन कृतार्थत्वात्। न च ताबत्सयोजनत्वेन धातुलोपइत्यनंतरं।
पाठेनैव सिद्धौ विहकरणं व्यर्थमेवेति वाच्यं। लाघवाभावात्। पाठस्याशोकवनिकान्यायेन चरितार्थत्वाच्च। ममतुऊ
दित्यत्र तु वृत्तौ स्थानेंतरतम इत्यस्य प्राप्यमाणानामनंतरतमव्यावर्तकत्वेनाप्रवृत्तौ न दोषो नापि भाष्यासंगतिरिति बोध्यं
एतेन उऊइतिहस्वदीर्घप्रश्लेषेण गोह इति विकृतनिर्देशप्रत्याख्यानेन विरुद्धेयमिति केषांचिदुक्तिरप्यपास्ता। उदु।
पधाया गुह इत्युक्तौ उक्तन्यायेन गुणबाधकत्वापत्तौ गुहयतीत्यनिष्टापत्तेश्चान च क्ङिति विषये क्ङिति चेति गुणनिषेधे
न तत्र चारितार्थ्यम्नोक्तन्यायाप्रवृत्तौ परत्वाद्गुणोइष्टसिद्धिरिति वाच्यं। निषेधेनापि तत्प्राप्तियोग्यतानपायात्। तेना
पि नसेइत्यन्यत्। अत एव संयुक्तेन लोपनिषेधेन रुत्वस्य चारितार्थ्येपि अपवादो रुर्नलोपं बाधिष्यत इति भाष्य

शांकरी संगतिः। किंचोत्तरसूत्रेपितत्प्रत्याख्यानस्यचिकीर्षितत्वेनतदर्थंयत्नांतरस्यावश्यकतापत्तेः। प्रश्लेषेतुदीर्घस्य
१७ रितत्त्वबलादनुवृत्तिसामर्थ्याच्चेष्टसिद्धेः। यद्यपिह्रस्वोकारकरणेपिभाव्यमानोप्युकारःसवर्णान्गृह्णातीत्यनेनेष्ट
सिद्धिर्भविष्यति।ऊदुपधायाइत्यत्रविवरणेउक्तंतथापितदुक्तयुक्त्याःस्वरस्यप्रस्तमतएवतत्सूचकमाहुरित्युक्त
मितिबोध्यं।स्वातंत्र्येणैतत्प्रत्याख्यानप्रकारस्तुप्रयोजनानामसत्वेनादसोसेरित्यत्रऊइतिदीर्घपाठइत्युक्तंप्रागि।
तिविशदंभाष्यतत्वविदां॥ गवेहितमिति।वाक्यइवसमासेपिकुत्वोत्वादयोनेतिभावः।नलुमतेतिनिषेध।
स्तुनप्रत्यासत्यालुप्तप्रत्ययनिमित्तकांगसंज्ञोद्देश्यकविधावेवनत्वष्टेत्तेरंगीकारात्।स्थानिवत्सूत्रेणसिद्धेः।त्विध्यर्थ
मिदमिति।अत्तरोडित्यादौआशीरित्यादौचतृणाहइम्‌शासइदङ्हलोरितिचसिद्ध्यति।सुहृष्मासादइत्यत्रसो।
र्मनसीअलोमोषसीइतिस्वरोऽत्वसंतस्येतिदीर्घश्चनभवति।मनसासाहचर्यात्तुनासाहचर्याच्चश्रूयमाणास्तंत
स्यैवोभयत्रग्रहणात्।तल्लक्षणमित्येवसिद्धेप्रत्ययलक्षणग्रहणंप्रत्ययनिमित्तकमेवेत्यर्थोपिद्रष्टव्यस्तेन
प्रत्ययस्येतराविशेषणत्वेपिगोहितमित्यादावबादिन।नचासुपश्लिष्टस्यैवोयवायावोभवंतीत्यर्थेनप्रत्यय। राम०
स्येतरविशेषणत्वमेवेतिवाच्यं।एवंसतिसर्वनामस्थानेचासंबुद्धौह्रस्वस्यगुणःत्रिचतुरोरित्यादिविधौप्रत्यय १७

नेनार्थवदधातुरित्यतोऽर्थवत्पदानुवृत्तिदर्शनेन च यथाश्रुतभाष्यप्रश्नानुपपत्त्या समासनिर्दिष्टानामित्येव तदर्थो
वाच्यः ननु परस्परान्वितानामिति। समासे हि वृत्तिस्वभावाद्राजपुरुषइत्येतद्घटकराजपुरुषपदयोरपि राजसंबं
धवत्पुरुषइत्यर्थे शक्तिरिति निर्विवादो न त्वेवं नामैकदेशानामग्रहणमित्युक्तदोषः। एवं च पाकमूलेइत्येतद्घटकमू
लपदस्य पाकमूलार्थकस्यार्थरहितस्य कथमनुवृत्तिरर्थाधिकारादिति प्रश्नः। शब्दाधिकाराश्रयणेन समाधिः।
एकत्रार्थ एकोपस्थितिरूपे युज्यमानं संबन्धं यत्पदं तेन निर्दिष्टानां पदानां मध्ये एकदेशोऽर्थरहितोऽप्यनुवर्तते। अ
नुमीयते शब्दाधिकाराश्रयणादित्युत्तरार्थः। समुदायाभिधायिद्वंद्वनिर्दिष्टयोरिति तु प्रकृताभिप्रायेण पूर्वपक्ष।
भाष्यव्याख्यानपरं बोध्यमिति लभ्यते। तथापि नेदं युक्तं। अतो नृशसोरिति सूत्रे चित्तवमित्यत्रात्वव्यावृत्तये वा
सुप्यापिशलेरित्यतः सुपीत्यनुवर्त्य वानुवृत्तिमुक्त्वा न्यायेनाशंक्यालुगुत्तरपदे इति दृष्टांतेन चारणपरभाष्यासंग
तेर्न हि दृष्टांते दार्ष्टांतिके वा समासनिर्देशोऽस्तीति येन तत्र वृत्तिसामंजस्यं भवेत्। तस्मान्न्यायद्वयस्य मदुक्तमेव प्र
वृत्तौ निवृत्तौ च बीजं। एकसंबंधान्वितानां परस्परमिलितानामित्येवार्थः। अत एवालुगुत्तरपदे इत्यस्यानन्तरं णोलेखः
। अत एव पूर्वत्र लोकदृष्टान्तोऽलेख्यश्च संगच्छते इति कृतबुद्धय एव विदांकुर्वंतु ज्यादादीयस इति। ननु नेदं ज्ञा

शांकरी· कारानुरोधेनप्रत्ययविधानावधिरूपस्यग्रहणेनवनोरचेत्यादौतेनसामानाधिकरण्याभावात्शब्दस्वरूपविशेष्य
१८ मादायैवतदंतविधेरावश्यकत्वादित्याशयात्।अतएवहलङ्याब्भ्यादिसूत्रेशब्दरत्नेबहुश्रेयसीत्यादौलोपायङ्या
बृस्यासुपस्थिततत्तदादीत्यनेनतत मनस्युपेत्यशब्दरूपंविशेष्यमादायतदंततांसंसाध्यस्फुतिसीत्येतदुपस्थिततत्त
दादादीत्येतद्वलेनद्वितीयस्तदंतविधिःसाधितः।अतएवएङ्ह्रस्वादित्यत्रोक्तप्राचीनप्रघट्टकशेखरादिःसंगच्छ
ते।अन्याय्याकुलेत्यादिसिद्धयेव्यधिकरणान्वयस्यावश्यकत्वेनएकदेशविकृतन्यायेनकर्त्तरदित्यादौरेफांतप्र
कृतित्वसत्त्वेनाकारांतत्तदादित्वस्यापिलाभेनचहलोलोपापत्त्याप्राचोक्तरीतेरावश्यकत्वेननतदसंगतिः।अत्रचङ
नरादिप्रतिषेधप्रत्याख्यानभाष्यमपिमानं।धर्मिग्राहकमानात्परिभाषायामपिप्रत्ययप्राग्भवित्वस्यतदादेर्ग्रहा
णान्नोक्तदोषइत्यन्ये।एतेनार्थवत्परिभाषयेष्टसिद्धिरितिनिरस्तं।विशिष्टरूपोपादानाभावात्।नचैवमपि
सनाद्यंताधातवइत्यत्रोपस्थिततत्तदादीत्यस्यानन्वयादुक्तदोषस्तदवस्थएवेतिवाच्यं।क्वचिदुपस्थिततत्तदादेर्ल
क्षणयातदितरपरत्वेनादोषात्।अतएवसुप्तिङंतमित्यत्रापिदोषोऽन्यथाप दसमुदायस्यपरत्वापत्तावनिष्टापत्तेः। राम·
रितिगूढाकृते।यत्रप्रत्ययोनिमित्तत्वेनाश्रियतइति।केणः।लुङ्·लङ्·लृङ्‌स्थुस्यतासीसुपिचरौसुपीत्यादौ।एवं १८

यद्देशेते परिभाषेड्‌इति बोध्यं यद्यपि प्रत्ययग्रहणे चापंचम्या इत्यस्य विशिष्यतया वक्ष्यमाणत्वेनात्रैतद्व्याख्या
नं न युक्तं तथापि विशेष्यविशेषणभावस्याव्यवस्थितत्वेन तत्र तत्र लक्ष्यानुरोधेनैवेष्टसिद्धौ तन्निष्फलमित्य
भिप्रायकत्वेनास्य प्राचामनुरोधित्वात् घट्टस्य सर्वस्याव्यवस्थार्थकत्वेन कृतार्थत्वादित्यन्यत्र स्पष्टं॥ गर्गादि
भ्यो यञित्यादौ पूर्वं यञो विधानाभावात्प्रत्ययत्वाभावेन विहिते तु पंचम्याः कृतार्थत्वेन पुनः प्रवृत्तौ मानाभावे
न चास्या विहितप्रत्ययविषयत्वं बोध्यं। नन्वेवं प्रत्ययग्रहणे तदादिनियमेनाधिकव्यावृत्तिर्नेर्गुन्मून स्येतितेन
इस्मानमित्यादौ वत्वं नान्त्वार्थ इति मात्रचः सिद्धिः अस्यापत्य मित्तदंता यञिजो अत्वेनि फकुसिद्धिश्चेत्यनुपस
र्जनादिति सूत्रविवरणरीत्या सुमनायन इत्यादावुपसर्गस्य पृथक्करणेन जातसमासाभावः कल्प्यत इति तिङ्
तोपणीत्या मनः शब्दस्य न विशिष्टस्येति तत्रत्य शेखररीत्या च देवदत्तश्चिकीर्षतीत्यादावधिकव्यावृत्तावपि
ईर्षइन्मस धातुत्वापत्तावुक्तदोषापत्तिः। अत एव भाष्ये प्राकरोदित्यादौ देवदत्तो गार्ग्यः परमगार्ग्यायण इत्या
दौ चाधिकव्यावृत्तिः फलमुक्तमिति चेन्न॥ देवदत्तस्यापत्यमिति विग्रहेऽवयवेपि एकार्थीभावांगीकारेण ष
ष्ठ्यंतात्तत्संघेरपत्यमित्यर्थे विधीयमानइञ् दत्तशब्दादपि स्यात्। राज्ञः पुरुष इत्यादाववयवस्यसमासइ।

शां.करी. त्यस्य षष्ठ्यंतत्वेन समासः स्यात्। ऋद्धस्य राज्ञः पुरुष इति समुदाये तद्व्याप्तावपि न्यूनेन तदभावात्। तस्माद्धि-
१९ कव्याप्तिरिव न्यूनव्याप्तिरप्यवश्यं वाच्या। सा च मुख्यव्यवहारविषये इयन्मात्रमित्यादौ त्वतिदेशेन तत्त्वमि-
ति न तत्र दोषः। भाष्ये तूपलक्षणतया नेयं। अन्यथाऽनया समुदायव्याप्तिसिद्धावप्यवयवव्याप्तेरकरणेन तत्र
तत्र न्यूनतापत्तेः। उद्योतादयस्तु तत्र तत्र कैयटानुरोधिन इति न तद्विरोधः। सुमनायत इत्यत्र तु उपसर्गस्य पृथक्करणे
न ज्ञातसमासाभावकल्पनेपि सुपः समुदायविहितत्वेनैतेनाधिकव्याप्तेरशक्यत्वान्नत्यशेखरश्चेत्यरावात्। त-
स्मात्तत्र समुदायादनुत्पत्तिरेव पृथक्करणेन बोध्यत इति तत्त्वं। उगितश्चेति सूत्रे भाष्ये इति। ननु प्रत्ययाप्रत्ययग्रह-
णेन तन्महत्तावपि वनो र चेत्यत्रैवोगितश्चेत्यत्रापि उगिदन्तान्तादित्यर्थे निर्गोमतीत्यादौ न दोषः। न च तदादौ त्वस्यो-
पस्थितौ उगित्प्रातिपदिके तदादित्वाभावाद्ङीबनापत्तिरिति वाच्यं। प्रत्ययाप्रत्ययकोटिद्वयस्य सत्त्वेन तत्र बा।
कयभेदेनोगिदन्तादिति व्याख्याने नोगित्प्रातिपदिकेष्वप्यदोषादिति चेत्तर्हि फलाभावात्तदप्रवृत्तिरित्याशयात्। अन-
एव संज्ञाविधाविति परिभाषाज्ञापकपरसुप्तिङन्तमिति सूत्रस्थभाष्यसंगतिः। अन्यथा प्रदेशे नलोपः प्रातिप- राम.
दिकान्तस्येत्यादौ तदन्तविधिसत्त्वेन प्रत्ययमात्रस्य पदसंज्ञासत्त्वेपि ज्ञापकस्याचारितार्थ्येनासंगतिः। तस्मात् १९

लक्षणानापत्तावनिष्टापत्तेः तस्मादितराविशेषणत्वमित्यस्य समानाधिकरणेतराविशेषणत्वमित्यर्थो वक्तव्यः॥
एवंच प्रकृते तत्त्वमस्त्येवेत्याहुः। वस्तुतो वार्तिकमते ऽस्त्विध्यर्थमेव प्रत्ययलक्षणसूत्रारंभोऽन्यत्र तु स्थानिवत्त्वेनै
वेष्टसिद्धिस्तत्रास्य प्रवृत्तेः फलाभावात्। एवंच सर्वनामस्थाने इत्यादावस्याप्रवृत्तावपि क्षत्वभावेन समानाधिक
रणेत्यादेरनुपयोगात्। अन्यथा सुप्तिङंतं सन्न्यकोः सर्वस्य सुपीत्याद्यवगत्यातदर्थं यत्नांतरस्य कर्त्तव्यतापत्तेश्चेति
दिक्। देवदत्तश्चिकीर्षतीत्यादाविति। आदिना देवदत्तो गार्ग्य इत्यस्य परिग्रहः। सन्नंतत्वादित्यादिना यङंतत्ताच।
परिग्रहः। धातुत्वादित्यादिना देवदत्तो गार्ग्य इत्यत्र प्राप्तप्रतिपादकत्वस्य संग्रहो बोध्यः। ननु विशेष्यासन्निधाना।
त्कथं तेन सिद्धेः सोत आह। सचेति ननु नित्यं स इत्युत्तरपदग्रहणेन विशेष्यांतरसत्वेपि तस्यैवाकरणात एव घनो।
रचेत्यादौ न दोष इति नेदं च मन्तव्यमिति चेत्। अयं भावः। विशेष्यांतरासत्व इत्य सोपस्थिततदर्थत्वस्य स्यैव प्रत्य।
येचेति निषेधनासत्व इत्यर्थः। तेनातिराजकुमारिरित्यत्र तद्विषयके गोस्त्रियोरिति सूत्रेन तदादिनियमाभावेपि तदं
तविधौ ह्रस्वसिद्धिः। तत्रोपसर्जनस्येति तु न विशेषणं गोशब्देपि तदापत्तौ अतिगुगौरित्यादौ ह्रस्वापत्तेः। यद्यपि त
दादेरित्युपस्थितविशेष्यमादाय तदंतविधिरन्यत्र तु शब्दस्वरूपमिति युक्तं वक्तुं। तथापि तदादीत्यस्यार्थाधि।

भावेन ततो लङ्गावनुत्पत्तेः। षाष्ठद्वित्वस्य द्विरुच्चारणरूपत्वेन विकाराभावेन लक्ष्ये लक्षणस्येति न्यायाप्रवृत्त्या पु
नर्धातुत्वे तु प्रत्ययाप्रत्ययग्रहणस्यातीवसत्त्वात्। वस्तुतः पूर्वं धातुत्वे धातोरिस्स्यस्येति वादिविधौ विहितविशे
षणत्वे मांतरं गत्वा तिवाद्युत्तरं सन्नंतसमुदायस्य प्रथमैकाच्त्वादेश्च सापेक्षत्वेन द्वित्वप्रवृत्तेः। लिटि धातो।
रित्यत्र धातुग्रहणं निष्ठतु तावत्साभ्यासिकमिति भाष्योक्ते र्धातोरित्यस्य निवृत्त्या शब्दांतरप्रासिक धातुसंज्ञाया
अप्रवृत्तेश्चेति चेन्न। देवदत्तो गार्ग्यः परमगार्ग्यायण इत्यादेर विवक्षितत्वादादिपदेन सूचित एव। प्रत्ययग्रह
णे चापंचम्या इति। यद्यपि भाष्ये तदंतविधिप्रयोजनकथनावसरे प्रत्ययग्रहणे चापंचम्याः प्रयोजनमित्यु
क्तं तथापि प्रत्ययग्रहणं चेति पूर्ववाक्येन प्राप्तं तदंतविधिरेव प्रत्यासत्त्या पंचम्या इत्यनेन निषिध्यते इत्यर्थ
तो लभ्यं। विधौ तु नास्योपयोगः। तत्रान्यथा वारणस्य प्रागुक्तत्वात्। अतः पर्यवसितमाह। परिगृह्यत इति। अनु
द्यत इत्यर्थः। प्रयोजनांतरमाह। यथेति। ननु चरितमित्यादौ नत्ववारणाय तत्र रदाभ्यामिति तकारविशेषणं।
निष्ठेति तत्र लुप्तषष्ठीकमिति निकदेशान्वयः। एवं च पंचम्यंतात्परप्रत्ययाश्रयणाभावादुक्तदोषस्तदवस्थ एवेति
चेन्न। प्रत्ययावयवेपि ——— प्रत्ययत्वव्यवहारस्य प्रत्ययलोप इति सूत्रे प्रत्ययग्रहणेन ज्ञापितत्वादत्त एवादे

श्नसत्ययोरिदुदुपधस्येत्यादौलक्षणाश्रयणांनसात्यदाद्योरितिचरितार्थमितिबोध्यं यद्वाक्तुमत्तिवेविचिन्त्ये
णरदाभ्यामितिनिष्ठायामित्येकदेशोपिविशेषणंयदागमपरिभाषायाअनित्यत्वादुक्तेर्नदोषः।लुप्तविभ
तयंतत्वकल्पनेगौरवं।निर्दिश्यमानपरिभाषयातुनात्रनिर्वाहः।निष्ठापदस्यैतच्छास्त्रसंकेतितत्वादत्रचदंभा
ष्यमपिमानमित्युक्तं।यद्यप्य~न्यविकोरेऽन्यस्येदेशस्येत्येवेदंसिद्धंतथापितीर्णवानित्यादौदोषःस्यादेवअतए
वेत्यादावित्युक्तं।नदोषइति।नचतत्रतदंतग्रहणाभावेपिङ्याब्भ्यांपरस्याप्रक्तस्यहल्लोलोपइत्यर्थेनदोषइति
वाच्यं।अनयातदंतांशानुपस्थितावपितदादौतदंशोपस्थित्यातदादेःपरोयोङीत्यर्थेहत्तेस्तुतिसीनामपिप्रत्ययत्वे
नोपस्थिततद्विधानादवधिभूततदादौत्येतद्विशेष्यतयाङ्याबंतात्तदादेरित्यर्थापत्तौवहुश्रेयसीत्यादौसुलोपा
नापत्तेःआदिनास्त्रीभ्योढगित्यादेःसंग्रहोबोध्यः।एतेनतदंतांशस्यनिषेधेपिहल्ङ्याविन्यत्रनदोषइतिपराभ
स्तं।यत्रप्रत्ययोनिमित्तत्वेनाश्रियतेएवंयत्रापीत्यनयोरन्यतरेवाक्योङ्गीकारोबोध्यः।तत्रयत्रकेणःसुपिचेत्या
दौपंचम्यंतासन्निधानंतत्राध्याहृतयोग्यंतमदमादायनिषेधोबोध्यस्तत्रप्रमाणमप्याह।अतएवेति।नाहर्यां
तन्त्यदमादायापितत्प्रवृत्तेरङ्गीकारादेवेत्यर्थः।कुमारिब्राह्मणीरूपेति।लौकिकवाक्यमिदंरूपंतुकुमारब्राह्मणी

शांकरी रूपेतिकर्मधारयेपुंवत्त्वविधानात्।यद्वाकुमारीब्राह्मणिरूपायस्यांनगर्यांइतिबहुव्रीहिस्तत्रजातेश्चेतिनि
२१ षेधान्नपुंवत्वं।कुमारादिशब्दानांवैकल्पिकजातिकार्यमित्यस्यभाष्यादिसंमतत्वात्॥प्रथमन्यायेवीजंतु
धर्मिग्राहकमानात्प्रत्ययत्वजात्याप्यधर्मावच्छिन्नव्यापकशब्दोपादानेएवैतत्प्रवृत्तिरूपे।अतएवरात्रेःकृति
विभाषाइत्यत्रननिषेधःरात्रेस्तदसंभवस्तुनाचारक्विबंतात्कृजादौतत्संभवात्।उपसर्गस्यघञीत्यत्रतुउप
सर्गाद्घञोऽसंभवान्ननिषेधः।कुमारब्राह्मणीतरेत्यत्रतुरूपबादिसाहचर्येणाहस्वोवारणीयः।संज्ञाविधा
वित्यनेननतुनसिद्धिः।तत्रसंज्ञाविधावितियदिकर्मषष्ठ्यासमासस्तर्हितरप्तमपौघइत्यत्रासत्यपितदंतविधे
प्रदेशेघरूपेत्यादौतदंतग्रहणाद्दोषनादवस्थ्यात्।अथवाकरणातृतीययासमासः।घसंज्ञायांतदंतविधौप्र
देशेघरूपेत्यादौप्रत्ययग्रहणाभावान्निषेधवैयर्थ्यप्रसंगात्।अथवासंबंधसामान्यषष्ठ्यासमासःसंज्ञायावि
धौसंज्ञयाचविधावितिनिष्ठेतिपूर्वनिपातविधौनिष्ठामात्रस्यपूर्वनिपातापत्तिः।नचकर्मषष्ठ्यासमासेन।
विधौनिषेधरावास्तु"प्रदेशेतत्सामर्थ्यात्तदभावोस्त्वितिशेखरप्रतिपादितमेवेतिवाच्यं।प्रत्ययग्रहणेचापंच राम·
म्याइत्यस्यहृषतीरांइत्युदाहरणदानपरत्वेनविधिरितिसूत्रभाष्यविरोधापत्तेः।रात्रेःकृतिविभाषेत्यत्रापितु। २१

थ्यान्तदेशेनदम्भावेस्तुनयुक्तइतिवक्ष्यते।नलोपविधावपिवाक्यभेदांगीकारेतुफलाभावस्तुल्यएवेतिबोध्यं
यत्त्ववयवावयवःसमुदायावयवइतिन्यायेननिर्यवमनीत्यादिसिद्धौप्रत्ययाप्रत्ययग्रहणेपितन्त्रप्रवृत्तौप्र
त्यभावइतितन्न।अवयवावयवत्वात्पूर्वयत्रावयवस्यावस्थानेनतत्रैवलोकसिद्धेनग्रहणबोधनात्।नन्वेवंप्रत्य
याप्रत्ययग्रहणेसतन्त्रप्रवृत्तौसनाद्यन्ताइत्यत्रापिप्रतीषिषतीतिप्रतीकस्यशेखरोक्तरीत्यासनइतिप्रत्ययाप्रत्य
यग्रहणेनदेवदत्तश्चिकीर्षतीतिपूर्वोक्तोदाहरणासंगतिः।नत्रहिअभ्यासांत्यस्याज्झनेतिदीर्घेनभवत्यनांग
त्वान्निषेधेत्यादावुत्तरखंडेसात्प्रदाद्योरितिवारणाय नावेवसुप्तिङोर्योततः परोसैवचप्रकृतिरायाआदि
ग्रहणेचकृत्तमित्यागंतुनामतेनिवेशाइत्यर्थकेकाचोद्दे इतिसूत्रस्यभाष्येणोत्तरखंडस्यसनंप्रत्ययाधिकारस्थ
त्वाभावेनप्रत्ययत्वाभावात्तन्नतत्वंतुस्वरूपतोऽस्त्येवेतितदंतस्यधातुत्वंभवत्येव।सन्प्रत्ययस्यांगावयवा
भ्यासस्यानङ्गस्यात्तन्निवृत्त्यर्थेनत्वमपिसुलभमित्युक्तं।नत्रषत्वंतुपूर्वत्रासिद्धमद्वित्वइत्युक्तेःषत्वेकृतेद्वित्व।
मित्याशयः।नचसन्यङोरित्यत्रलिटिधातोरित्यतोधातोरित्यनुवृत्तेःपूर्वंधातुत्वेसत्येवद्वित्वप्रवृत्त्याप्रतीष।
इत्यवस्थायामेवसनाद्यन्ताइत्यस्यप्रवृत्तेः।नचप्रत्ययाप्रत्ययग्रहणमितिवाच्यं।एवंसतिकृतद्वित्वस्यधातुत्वा

त्ययग्रहणादितिपरिभाषास्वीकारेऽतिकारीषगंध्यापुत्रइत्यत्रेवात्रापिस्यादित्यर्थः। मरुवहुशीनेरजलमितिय
थातत्र न तथात्रापिनेतियावत्। यद्वायथाश्रुतमेवष्यङइतिप्रत्ययग्रहणेनशब्दरूपविशेष्यमादायतदंत।
विधावुत्तरपदाक्षिप्तपूर्वपदमपिविशेष्यमितिष्यङंतांतइत्यर्थस्यपरमकारीषगंधीत्याद्यर्थमावश्यकत्वे
नतत्रेवात्रापिस्यादित्यर्थः। ननुविषयसप्तमीत्वस्वीकारेप्रत्ययेगृह्यमाणेसत्यनुपसर्जनस्त्रीप्रत्ययविषये।
तदादिनियमोनान्यत्रत्तुसोऽस्त्येवेत्यर्थेनतद्विषयकवाक्योपप्लवसत्वेनानुपसर्जनविषयकवाक्यस्यपरम
कारीषगंधीपुत्रइत्यादौसंप्रसारणार्थतयासार्थक्येपिउपसर्जनंयत्ष्यङंतदादितदंतस्यपूर्वपदस्यसंप्रसारण
मित्युपसर्जनविषयकवाक्यस्यैवयर्थ्यमेवतादृशलक्ष्याभावात्। यद्यपिकारीषगंध्यापतिःस्वामिनीयस्येतिव
हुव्रीहौतत्संभवस्तथापिपरिभाषायांप्रत्यासत्तेराश्रयणेनयस्यसमुदायस्यस्त्रीप्रत्ययांतत्वमानेयंतदर्थप्रत्युपस
र्जनत्वेएवतदादिनियमांगीकारादितिचेन्न। प्रतिलक्ष्यंलक्षणोपप्लवस्यसर्वत्रसत्वेपिविप्रतिषेधेपरमित्यादि
नानतद्विषयकवाक्योपप्लवाभावबोधनमिवोपसर्जनविषयेपितदादिनियमोभवतीतिअनेनतद्विषयकवा
क्यस्यैवाभावबोधनात्। सामान्यतःप्राप्ततदादिनियमस्यानुपसर्जनविषयेपिनिषेधमात्रार्थकत्वेपिउपसर्ज

नविषयांशेतात्सामर्थ्याभावाच्च। केचित्तुकारीषगंध्यामतिक्रांताकारीषगंध्याविनापिप्रत्ययंपूर्वपदस्यलोपः। त
स्याः पतिरितिकारीषगंधीपतिरित्यत्रतत्संभवोप्यस्तीत्याहुः। नन्वेवंदृष्टामालेत्यादौस्त्रावेनानुत्पत्त्यर्थंङ्याब्
ग्रहणमावश्यकंतद्धादितिद्विमाभावादेवंचतत्प्रत्याख्यानासंगतिः नह्यत्रलिंगविशिष्टपरिभाषावसरः। स्त्राभहित
स्यदृष्टामालेत्यादेःसमुदायस्यप्रातिपदिकत्वाभावात्तस्यत्राम्दृष्टमालादेवदत्तेत्यादौएकांतरत्वेनएकांतरता
पतिरितिचेत्सत्यं। प्रत्याख्यानपरभाष्यप्रामाण्येनप्रातिपदिकसाहचर्येणाचष्टयगर्ग्योपस्थापकविभक्तावव
यवकङ्यावंतस्यैवग्रहणात्। प्रत्येकमपिपदत्वसत्वेनैकांतरत्वाभावाच्चादोषादितिसंक्षेपः। ङ्याप्सूत्रेशब्दरत्नेइति
बोध्यं। इयंवाचनिक्येवेति। केचित्तुप्रत्ययग्रहणेयस्मादितिपरिभाषाग्राहकेपूर्वोक्तयस्मात्प्रत्ययविधिस्तदादीति
योगविभागेनङ्यङ्वयङ्करमतो स्त्रीत्यनुवर्त्यशब्दाधिकाराश्रयणादर्थपरत्वंसंपाद्यस्त्रीप्रत्ययइत्यर्थेयूस्त्र्या
ख्येत्यतःस्त्र्याख्येत्यनुवर्त्यतेनस्त्रीप्रत्ययस्यैवविशेषणात्प्रधानस्त्रीवाचकस्त्रीप्रत्ययभिन्नप्रत्ययग्रहणेत
दादिविधिरित्यर्थादियंलब्धेत्याहुः। तत्रभाष्यानुग्रहोविचार्यः। यत्तुष्यङःइतिसूत्रेऽनुपसर्जनस्येत्येवास्तुत
त्सामर्थ्यात्तदादिनियमाभावः। एवंचष्यङंतस्यानुपसर्जनत्वाव्यभिचारात्ष्यङोविशेषणंतत्। अनुपसर्जनस्य

शांकरी त्यङ्‌।तदंतस्यसंप्रसारणमित्यर्थः।तिकारीषगंध्यापुत्रइत्यादौनदोषः।गोस्त्रियोरित्यत्रापिशब्दरूपंविशेष्य-
२३ मादायलभ्यतदंतेनोपसर्जनस्यविशेषणात्स्त्रीप्रत्ययांतांतंयदुपसर्जनंतदंतस्यप्रातिपदिकस्येत्यर्थेनातिरा
जकुमारिरित्यादावपिनदोषः।अतिकुमारिरित्यादौतुव्यपदेशिवद्भावोबोध्यः।एवंचप्रयोजनानामन्यथासि
द्धत्वेननैषालक्ष्यसाधिकेतिचेन्न॥अतिगोवष्कयणीत्यादौवष्कयणीशब्दस्यगुणशब्दत्वाल्लौकिकोपसर्जन
त्वेपितदंतस्यगोस्त्रियोपसर्जनत्वसत्वेनह्रस्वापत्तेः।नचसिद्धांतेपितत्रतदंतह्रस्वेबाधकाभावेनेष्टापत्तिरिति
वाच्यं।गोस्त्रियोरितिसूत्रेभाष्येऽतिराजकुमारीत्यत्रह्रस्वत्वमाशंक्योक्तपरिभाषयाकृतसमाधेरेवतद्बाधकत्वस
त्वात्।अन्यथापरिभाषायाअस्वीकारेपितद्वदुक्तरीत्यादोषस्यदुष्परिहारत्वेनतदसंगतिस्स्पष्टैव।उपसर्जनस्य
विशेषणात्वेगोशब्दांशेपितदंतविधौशोभनागौःसुगौःनगौरगौःनपूजनादितितत्पुरुषादित्याभ्यांसमासो।-
नाभावः।परमासुगौरगौर्वायस्यपरमसुगौःपरमागौरित्यादावपितदापत्तेश्च।ससहायेव्यपदेशिवद्भावाप्रवृ
त्त्यातिमालेचित्रगुरित्यादावगतेश्चेत्यलं।नन्वेवंतरप्तमपाविति।अत्रयद्वक्तव्यंतदुक्तंकर्मणिक्तांतइति।केचि- राम
त्त्यतः।केइतितृतीयाकर्मणीत्यतःकर्मणीतिचानुवर्ततइतिभावः।परात्परत्वाभावेनचेति।नचकुत्सनेचसुपी २३

द्भावापत्तेश्च निषेधासत्त्वे प्रदेशेन तदंतहृये गोरपरमब्राह्मणितरेत्यत्र ह्रस्वः प्राप्नोति सत्वे तु तस्मिन् विधौ न निषे
धे प्रदेशेन तदंतविधौ गौरब्राह्मणितरेत्यत्रैव प्राप्नोतीति फलभेदस्य येन विधिरित्यत्र कैयटेनैवोक्तत्वाच्च। निष्ठे॥
त्यत्रोक्तदोषापत्तेश्च तत्रान्यशेखरस्य प्राचामनुरोधित्वमेवेति वोध्यं। उत्तरपदाधिकार इतितु मत्या सत्या उ॥
त्तरपदविशेष्यतया प्राप्ततदंतविधेरेव निषेधिका। अत एव घरूपेत्यत्र उत्तरपदाक्षिप्तपूर्वपदेन प्राप्तस्य
न निषेधः अन्यथा भाषितपुंस्कादित्येतत्सामानाधिकरण्येनानेकाचः भाषितपुंस्काद्योडीतस्य ह्रस्वइत्यर्था
पत्तौ यति रूपेत्यादौ ह्रस्वानापत्तेः। इणः शतरि ङीपि च रूपमेतत्। अत एव घ्यङ् इति सूत्रे घ्यङंतस्य पूर्वपद
स्येत्यर्थसिद्धिः। अन्यथा योग्यत्वात्तदाक्षेपाभावेनातिकारीषगंध्यापुत्र इत्यत्रापि तदापत्तिः। एतेन सुपि चेत्या
दाविव योग्यस्य पंचम्यंतान्यतरत्वमादाय प्रत्ययग्रहणे चापंचम्या इत्यनेनैवेष्टसिद्धौ वियंव्यर्थेत्यपास्तं शब्द
स्वरूपं विशेष्यमादाय प्राप्ततदंतस्यानेन निषेधे पि उत्तरपदे इत्यादि विशेष्यत्वेन प्राप्तस्य तदलाभाच्च॥ एतेः
कृतीयादावपि तदापत्तेश्च॥ अत एव लेखग्रहणस्य ज्ञापकत्वसंगतिः। अन्यथानेन निषेधे लेखशब्दे तदप्रा
प्तौ विध्यर्थं तत्स्यादिति न तत्संगतिरिति दिक्। नन्वेवं परमकारीषगंधीपुत्र इति। इव शब्दो भिन्नक्रमः। एवं प्र॥

मेवैनैकदेशयुक्तित्वकल्पनमपीति। नन्वेवमभ्युद्धृतमित्यत्रैव दूरादागत इत्यत्रापि प्राप्नोति। न च कारकाद्
दत्तश्रुतयोरित्यत्र कारकादिति योगविभागेन कारकात्परं गतिपूर्वपदं क्तान्तमन्तोदात्तमित्यर्थकेनादोष इति वा॥
च्यं एवं तर्हि कारकादेव परं गतिपूर्वपदं क्तान्तमन्तोदात्तमिति नियमार्थकयोगविभागेनैवाभ्युद्धृतमित्यादौ य
थादिस्वरप्राप्त्याच्छादुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वसिद्धावनन्तरग्रहणस्य ज्ञापितेऽप्यचारितार्थ्यात् भाष्यासंग
तेश्च। तस्मादुक्तन्यायाज्ज्ञापकपरभाष्यप्रामाण्याच्च पूर्वभाष्यस्यैकदेशयुक्तित्वेनाभ्युद्धृतमित्यादौ व्यवहित
निवृत्त्यर्थमेव अनन्तरग्रहणमिति ज्ञापकमेव। वस्तुतो भाष्ये अनन्तरग्रहणस्य प्रयोजनत्रयमुक्त्वा ज्ञापका
र्थमेवस्यापि तेन तु प्रयोजनान्तरमपीति तत्र व्यवहितनिवृत्त्यर्थमत्त गतिर्गताविति परत्वाद्बाधात्। नाप्यपूर्व
पदत्वे स्वरार्थं। कारकादिति योगविभागेनैव सिद्धेः। तस्मात्तज्ज्ञापकार्थमेवेत्यत्वान्यत्रैवात्रापि ज्ञापकत्वं किंतु
बाधकमात्रमिति लभ्यत इति बोध्यं। यत्रेति। ननु यत्र गतिकारकसमभिव्याहृतं क्तान्तं तत्र तद्विशिष्टस्यैव ग्रहणाद्
देवदत्तेन कृतमित्यादौ कृतमित्यादेः प्रातिपदिकत्वं न स्यात्। समुदायस्य तत्त्वेऽपि समासग्रहणात्तन्नियमेन
न परत्वाद्बाधादवयवस्य च कृदन्तत्वाभावादिति चेन्न। विध्युद्देश्यतावच्छेदकाक्रान्तस्य तत्समभिव्याहारेऽ

त्यर्थात्। अत एव गतिकारकोपपदानामित्यस्य सांकूटितमिति फलमुक्तं भाष्ये। अन्यथांत्यं न स्वार्थिकत्वेन सु
बुत्पत्तेः प्राक्प्रवृत्तावप्यनया परिभाषया विशिष्टादेवाणि सिद्धे न तदसंगतिः स्पष्टैव। तत्रापि प्रातिपदिकाधिका
रणावाक्यस्यांतत्वेन विशिष्टादृश्यत्वाभावात्। परत्वादिति। उत्कृष्टत्वादपवादत्वादित्यर्थः। तक्रकौडिन्यन्यायादिति
भाव स्त्रीप्रत्यये चेति निषेधविषये व्यावक्रोशीत्यादौ चरितार्थेऽपि तत्प्राप्तियोग्यतायास्तत्रापि सत्वात्। यद्यपि णा-
वस्त्रियामित्यत्र तदादिनियमेन निषिद्धे समुदायादेव भविष्यतीति नास्य फलं तथापि अवयवात्तु तत्प्राप्तत्वे फ
लस्य सत्त्वादिति भावः। अन्यथेति। अत एव भाष्ये गतिकारकेत्युक्त्वा एवमप्यवयवादुपेति प्राप्नोतीत्याशंक्यानया-
समाहितं। नन्विति। तत्फलं तु अणि नियुक्ते इति स्वरविधायके अस्यानुपस्थित्या छत्रधार इत्यादौ स्वरसिद्धिरिति।
बोध्यं। तेनेष्टकचितमिति। इष्टकेषीकेति सूत्रे उत्तरपदाधिकारेण पूर्वपदाक्षेपात्तदंतविधिरिति भावः। तच्चावश्य
कोऽन्यथा पक्वाश्च इष्टकाश्च चिताश्चेति समाहारे पूर्वपदत्वाभावेऽपि ह्रस्वापत्तेः। पक्वेष्टकचितमिति चेष्यत इति भा-
वः। एतेन तदादिशेषे फलाभावादिति मंदः परास्तः। यत्तु योऽर्थवानिति आद्यंतवदिति सूत्रे भाष्ये तत्प्रत्याख्या-
नायाश्रितलोकसिद्धन्यायप्रयोजनमियाय जहारेत्यादि प्रदर्शितं। तत्र कैयटेनेत्थं वर्णितं। अर्थवान्यो धातुस्त

दवयवएकोजिनि। यद्यपितत्रभेदाभावादवयवत्वासंभवस्तथापिरातन्यायवशाद्धोढुंतदस्तीतिइयायेत्या
दौएकाज्त्वोपपत्तिर्गौणी। अन्यपदार्थत्वेनविवक्षितेऽर्थेसोपादानैर्वर्तिपदार्थत्वेनतत्त्यागः प्रतिलक्ष्यंलक्षणोपप्ल
वादनर्थकसमुदायविषयत्वुर्णुनावेत्यादौनदोषस्तद्विषयकलक्षणांतरस्यकल्पनादितिकैयटादयः। मुख्य
व्यवहारत्वादिति। अयंभावः। एवंसतिइयायेतिन्यायप्रयोजनंभाष्योक्तंविरुद्धंस्यात्। एकपदाक्रगित्यादावि।
त्वार्थविशिष्टधातोरन्यपदार्थत्तयाइकारादेर्वर्णस्यतदवयवत्तयाचमुख्यव्यवहारस्यैवसत्त्वात्। नचभाष्येव्यव
हारस्यैयायेत्यादौउक्तरीत्यासंभवेनसकृत्तोनाशिश्रियत् इतिवाच्यं। द्वित्वविधावर्थविशिष्टस्यान्यपदार्थत्वे।
नैकाचइतिबहुव्रीहावनर्थकेउर्णुनावेत्यादावगत्यातत्रप्रथमत्वस्याप्यतिदेशेनैववाच्यतयाचार्धजरतीयस्यानौ
चित्यादित्यादिनतत्रमुख्यव्यवहारमदिद्रियदितिवोध्यं। एकपदाक्रगित्यत्रहिन्यायस्यास्यालौकिकसिद्धत्वप्रति
पादनावसरेयद्वर्णसमुदायः पदंपदसमुदायंक्रकुइत्युच्यतेएकस्मिन्नपितत्प्रयुज्यतेएकपदाक्रगित्युक्त्वाअ
र्थेनयुक्तोव्यपदेशः। पदंनामार्थःनामइतिप्रातिपदिकोर्थस्यान्यपदार्थइतिमुख्यएवव्यवहारइत्युक्त्वापुत्रेतिदृष्टां
तेनन्यायःसाधितोभाष्ये। तत्रत्यकैयटोक्तप्रकारस्तुनयुक्तइति। स्वयंभाष्यार्थमाह। कृत्स्नेति। असहायइत्यस्या।

त्वतः प्राक्पदाधिकार इति स्वयमेव पदादिति सूत्रे स्थापितत्वेन गतिरनन्तर इत्यस्य ततः परत्वेनायुक्तमिदमिति चे
न्न हेतौ च शब्दः यतः पदादिस्थत्वमतः पदान्तरत्वाभाव इत्यर्थः। छन्दोबद्धवाक्ये यत्र पादादिस्थत्वं तत्र पदान्तर
त्वाभावस्यानुमाने यत्र पदादिस्थत्वं तत्र तत्परस्येति नान्यत्रातिप्रसंग इति भावः। इत्थमेव व्याख्येयं यथा
श्रुतित्वसंगतिस्स्यादेवेति बोध्यं। एवं चाभ्युद्धृतमित्यस्य यदि पादादिस्थत्वं तदानन्तरग्रहणस्य फलमिति ज्ञा
पकत्वमिति बोध्यं। यद्यपि भाष्ये ऽनन्तरग्रहणमनर्थकं गतिर्गताविति वचनादित्युक्तं। तथापि तदेकदेश्यु
क्तमुक्तयुक्तेः। अत एवाग्रे भवत्येषा परिभाषा तद्ग्रहणे गतिकारकपूर्वस्यापीति। यदयमनन्तरग्रहणं करोति
इत्युपसंहृतमिति न तेनानन्तरदधिकारबाध उचित इति बोध्यं। ननु तत्प्रामाण्यात्तदनधिकार एवास्तु। एवं च
नाभ्युद्धृतमित्यनन्तरग्रहणस्य फलं ज्ञापकपरं भाष्यं त्वन्यथा योजनीयमित्याह। नचेत्यादि। अयं भावः।
बहुव्रीहौ प्रकृत्येत्यतः पूर्वपदग्रहणमत्रानुवर्तते। उत्तरत्रानुवृत्त्यर्थमन्यथा मंडूकप्लुत्यापत्तिः। एवं चाभ्यु
दात्तोद्धृतशब्दस्याभिनासमासे प्राप्तस्य सतिशिष्टथाथादिस्वरस्यापि बाधनार्थमनन्तरस्योदात्ते पूर्वपदत्वेपि॥
आद्युदात्तत्वायानन्तरग्रहणं तत्तु परिभाषां विना न संभवतीति ज्ञापकमिति भाष्याशयः। एवं च भाष्ययोरेक

त्रस्य सर्वनाम्नो निर्देशः। सतिसप्तमी नत्वधिकरणे ऽऔपश्लेषिके वांतो यीत्यादौ नत्संभवेपि नेड्वशीत्यादौ त
दभावात्। यद्यपि तस्मिन्निति निर्वद्यस्मिन्नित्य स्यापि सप्तम्यंतार्थे इत्यर्थस्तु वचस्तथापि इतिशब्दाभावे नास्य
श्चेति वक्ष्यमाणविरोधेनाल्ग्रहणे इत्यनेनान्वये न तथा नाश्रितः ऽअल्ग्रहणे इत्यस्य हि ऽअधिकरणोल्तु दान्त्र
ल उच्चारणे इति नार्थः प्रत्याहारग्रहणे तस्मात्तुडचीत्यादौ दोषापत्तेः। इको चिव्यंजने माभूदित्यत्र व्यंजनादावितिः
व्याख्यानपरभाष्यविरोधापत्तेश्च। किंतु बाहुलकात्कर्मणि ल्युडन्त्र लः प्रतिपादकशब्दे सतीत्यर्थः। तदादावित्यत्र
तच्छब्देन सप्तम्यंतार्थः परामर्शनीयः। एवं च सप्तम्यंते विशेषणीभूतेः लप्रतिपादकशब्दे सतियद्विधानं तत्तदा
दौ बोध्यमित्यर्थः फलित इति बोध्यं। घञजपः पुंसीत्युक्तेरपवाद इयमित्युक्तं। वचनेन निर्वृत्ता वाचनिकी। इयं चे
ति नन्वार्धधातुकस्येड्वलीत्युक्तौ सामानाधिकरण्याभावाद्यस्मिन्निति परिभाषाया ऽअप्रवृत्तौ तस्मिन्निति परिभाषाप्र
वृत्त्या वलरकार्धधातुकस्येडित्यर्थे भविष्यतीत्यादावेव प्राप्नोति न तु भवितेत्यादावपीति नेड्वशीत्यादिनिषेधस्तु।
सुशर्मा देवदत्त इत्यादौ चरितार्थः। एवं चादिग्रहणं सफलमिति चेन्न। बहुलक्ष्यसंस्कारानुरोधेन तस्मात्तुडची 
त्यादावचीत्यस्येव वलीति सप्तम्याः षष्ठ्यर्थत्वांगीकारेण तस्मिन्नित्यस्याप्रवृत्त्या सामानाधिकरण्यस्यापिस 

त्वेन परिभाषाप्रवृत्तेर्निर्विघ्नत्वादित्याशयात्। तेन ङः सीति। ननु तदंतविध्यभावादपदस्येत्यस्यैवैयधिकरण्य
स्यावश्यकत्वेन सामानाधिकरण्याभावादेव न तदादिविधिरत एव शेखरे पदावयवस्येत्यर्थ इति व्याख्या
तं। अन्यथानेन तदभावेपि तदंतविधिर्दुर्वारः स्यादिति चेदयं भावः पदस्येत्यधिकारेपि श्रुतत्वाद्धुकारेण वि
शेष्यते। तत्र तदादिविधौ परत्वात्तु नङ्त्याद्यवकाशत्वेपि तदंतविधौ शास्त्राबोधिताऽव्यवहितहल्त्वसमु
दायस्य सुङ्क्ष्योरित्यादिनिर्देशेनासाधुत्वबोधनेन सकारस्य संयोगांतलोपेन चङकाराव्यवहितपरोयः।
सकारस्तदंतस्य पदस्येत्यर्थे सूत्रस्याचारितार्थ्येन संयोगांतलोपबाधापेक्षयाऽत्कूट्स्य श्रुतान्वयस्यैव बाधे।
ध्याच मादुपधाया इत्यादौ स्वीकृतपदस्येत्यस्यावयवषष्ठ्यंतस्यैव सामर्थ्यात्स्वीकार इत्यभिप्रेत्य शेखरे।
तथा व्याख्यानमिति बोध्यं। केचित्तु चिंत्यमिदं। लक्ष्यानुरोधेन शास्त्रप्रत्याख्यानस्याचमत्कारावहत्वेनादिग्र
हणस्यावश्यकत्वात्। तत्तात्पर्यकमेव तदादिग्रहणमित्यस्य वक्तुं शक्यत्वात्। ङः सो धुडिति न्यासेन तत्रा।
दोषाच्च। यथान्यासेपि क्रौंतेरंडा विवाह श्वेदादावेव कुत्तोन हीति न्यायेनांततो लक्ष्यानुरोधस्यावश्यकत्वेना
दावेव तत्स्वीकारेऽदोषाच्च। तीषसहसे सिचीत्यादावेकदेशान्वयस्वीकारस्याप्यनावश्यकत्वाच्च। न च तत्कारा।

 व्यवहितपरके छ्वादेः परस्यवलाद्यार्धधातुकस्येडित्याद्यर्थेन नैकदेशान्वय इति बोध्यं। एवं हि सति वांतो यीत्या
 दावप्युक्तरीत्या यकाराव्यवहितपरकयोरोदौतोः वांतादेशः व्यवहितप्रत्यये परे इत्यर्थे र्याद्यादिप्रत्ययलाभे परि
भाषोच्छेदापत्तेः। प्राचां हलादावित्यादिग्रहणेन परिभाषानित्यत्वलाभेन ङः सीत्यादावदोषाच्च। एवमप्येकदेशा
न्वयाकरणेन लाघवमतएव क्ङ्यल्य इति सूत्रस्थं भाष्यमपि स्वरसतः संगच्छत इत्याहुः। ननु क्षियइतीति। क्षि।
योदीर्घादिति नत्वविधायके शास्त्रे इत्यर्थः। ननु क्षियइति दीर्घविधायके निष्ठायामण्यदर्थे इति दीर्घविधायके
च तत्र दीर्घान्तानुकरणस्याप्रयोजकत्वेन चिक्षियतुरित्यादौ अजादौ यद्रूपं तस्य क्ङितेयङ्कस्यानुकरणत्वात्तत्क्ङि।
त्वांतस्य तुनानुकरणं। विपराभ्यां जेरित्यादाविव परत्वादियङं बाधित्वा गुणः स्यात्। नच नत्वविधावपि तथैवास्तु अ
तएव दीर्घादिति सार्थकमन्यथा दीर्घान्तस्यैवानुकरणे तद्वैयर्थ्यमेवेति। अतएव तत्र शेखरे सुक्ङितेयङ्कस्यानुक
रणाद्दीर्घग्रहणमन्यथा निर्देशेनैव सिद्धमित्युक्तमिति वाच्यं। दीर्घादित्यस्य सत्त्वे हि तत्र दीर्घान्तानुकरणं तदभावे
क्ङितेयङ्कस्यानुकरणमिति संभाव्यम्। तेन हि दीर्घान्तानुकरणस्यैव बोधनादित्याशयात्॥ ❁ ॥ अतो न शेखरवि 
रोधः। तएवाह ज्ञापक इति। ननु नत्वविधायके क्षियइति यङ् निर्देशो ज्ञापक इत्यर्थः। एतेनात्रापि क्ङितेयङ्कस्या 

तिदिश्यमानधर्मवदसमभिव्याहारेत्यर्थः। ननु घटादिशब्देपि जराशब्दत्वातिदेशः स्यात्। व्यपदेशहेतुत्वभा
वेनाविद्यमानव्यपदेशेन चेयायेत्यादाविवन्यायप्रवृत्तिरितिचेन्न। स्वसजातीयावधिव्यवहारस्यभेदनिबंध
नस्यचानेनानिदेशात्। अतएव दृष्टांतद्वयोल्लेखः। अस्तिचेयायेत्यादौ एकाच्त्वावयवावयवित्वस्यप्रथमत्वेस
जातीयनिष्ठधर्मस्यचानिदेशः। सामान्यंचनतद्विधिविधेयकार्यनिरूपितोद्देश्यतावच्छेदकधर्माक्रांतसमुदायघ
टकत्वरूपमितिबोध्यं। नन्वेवमपि स्वस्मिन्स्वाव्यवहितपूर्वत्वस्यातिदेशः प्राप्नोतितत अश्वदधिमधुइत्यादौय।
णादिः स्यादितिचेन्न। ततद्विधौ तेतन्निमित्तोपादानवैयर्थ्येन तदनतिदेशादितिदिक्। ननुवांतोयीत्यादाविति।
नन्वंतरेणापिपरिभाषांसामर्थ्यात्तदादेर्लाभः। अन्यथा नदंतविधौ यांतेइत्यर्थापत्त्या सूत्रानर्थक्यंस्पष्टमेवेतिचे
न्न। गव्यितानाव्यितेत्यादौ अल्लोपेकृते यांतप्रत्ययसंभवात्। नचाल्लोपस्यस्थानिवत्त्वंनकारेपरेकुत्वविधानेनश्रौ
तव्यवधानस्यैवयांतेवांतविधानेनापिश्रौतयांतत्वस्यविवक्षणात्। नपदांतेतिनिषेधस्तुननः क्येइतिनियमे
नापदत्वात्। आदेशस्यपरपदस्यत्वाभावाच्च। किंचगोमयमजनीतिगोमयान्नक्विपूतमाचष्टेणिच्टिलोपे। अ
लादेशत्वेनस्थानिवत्त्वाभावेनप्रत्ययस्ययांतत्वापत्तेः अतएवाह। यस्मिन्विधिरिति। सप्तम्यंतपदार्थकस्यस्वत

प्र.कौ. अशास्त्रीयत्वेनस्थानिवत्त्वाप्रवृत्तेरितिबोध्यं।गुडोदकमित्यत्रानेनङकारान्तेपूर्वपदत्वेनएकादेशविशिष्टेउदक।
२८ शब्दत्वेनोदकेकेवलेइतिस्वरसिद्धिर्नास्यफलं।उपसर्गस्येतिलत्वेप्लायतेइत्यत्राचःपरस्मिन्नितिस्थानिवत्त्वेनेवा
त्वापिव्यपवर्गस्यसुलभत्वात्।अजीगणदित्यत्रईचगणइत्यपिनासाधारणंतत्रैतत्सामर्थ्येनापिइत्वंफलमिति
बोध्यं।अर्थस्यायमार्थः।समाजस्समुदायस्तेनग्रस्तंग्रथितंअर्थसंबंधिसमुदायांतर्भूतमित्यर्थः।स्वलमवहारः।
स्वलमयोजकोव्यवहारइत्यर्थः।अनुकरणमिति।अष्टाध्याय्यांतांतदाव्यच्छन्दस्या—दर्शनादितिभावः।एक
देशविकृतन्यायेनदीव्यतिशब्दैकदेशस्यतदर्थबोधकस्यदीव्यच्छन्दस्योच्चारणमित्यर्थः।यथास्तुतंतुनसाधु।
अनुकरणस्यशब्दपरत्वेनार्थस्यावधित्वंनस्यात्इतिस्पष्टमुद्यो—ते।किमर्थमिदमितीति।एवंहिलाघवात्प्राग्दीव्य
तेरणइतिवक्तव्येतत्त्यक्त्वाप्राग्दीव्यतइतिनिर्देशःकिमर्थइत्यर्थः।ननुमास्तुसूत्रेऽनुकरणतातांतस्यैवावधित्वम।
स्त्वितिचेन्न।अवध्यवधिमतोःसाजात्यमितिनियमादर्थस्यइष्टमवधित्वंनस्यात्।तथाचातइञित्यत्रापिञोःपर्या
येणविधानंस्यादित्याशयात्।अनेनैकदेशविकृतोप्यर्थबोधकएवेतिसूचितमितिबोध्यं।विकृतावयवेति।अत। राम.
एवमघवतःराजकीयमित्यादौसंप्रसारणाल्लोपौन।अन्यथानेनन्यायेनानंतत्वात्।श्वयुवेतिसंप्रसारणंस्यात् २८

राज्ञः क्वचेति कादेशेप्यनेनत्वादल्लोपो न इति स्यात् मघवतश्छांदसत्वेनानइत्यपकर्षणे फलाभावेन च न तत्र न दोष इ
त्यन्ये। अत्रपरिमाणइति। लोके दृष्टस्य परिमाणत्वस्यात्रासंभवाच्छब्दानुपूर्वीविशेषरूपं गृह्यते। उक्तयुक्तेरिति।
यथा लोके पंचद्रोणादिशब्दानां परिमाणार्थवाचकानां न्यूनाधिकयोः प्रवृत्तिस्तेषां परिच्छिन्नपरिमाणार्थे।
कत्वाद्रुपपादा। एवं सर्वाद्यानुपूर्वीविशेषोपादानेन क्रियमाण सर्वनामसंज्ञा न्यूनेधिके वा सर्वकादौ च न
विना दुरुपपादा इत्युक्तयुक्तेरित्यर्थः। नन्वेवमेनादिवच्चेत्येतत्प्रयोजने गुडोदकमित्यादावुदकेकेवले इति पूर्वप
दांतोदात्तत्वमनेन न दकशब्दस्योदकशब्दत्वमाश्रित्य साधितं भाष्योक्तं विरुध्येत। तत्रोदक इत्यक्तपरिमाणाग्रहणा।
आल्वीयतइत्यक्तपरिमाणाग्रहणेनैतज्ज्ञापकपरं भाष्यं च विरुध्येत। भाष्यांतरं चनादृशनीयमलभ्यतएवेत्यत आह।।
एतदिति। तत्र हि पंचद्रोणादिदृष्टांतेन उक्तस्थले तदभावमाशंक्य ज्ञापकेन तदेकदेशभूत इतिन्यायेन समाहितं यदि
तत्रैतत्प्रवृत्तिस्तर्हि न्यूनाधिकगङ्गादिसत्वेपि शुनश्छत्ववदकजधिकस्य सर्वकस्य सर्वशब्दत्वमक्षतमेवेति भाष्यासं
गतिरनत्स्याद्यानवदकृतमिति भावः। एतेनानेनन्यायेन पूर्वपदत्वं भाष्याभिप्रेतं न तूदकशब्दत्वमिति नन द्विरोध इ
त्यपास्तं। अंतादिवच्चेत्यत्र पूर्वांतवत्वस्य तत्प्रयोजनस्योक्तत्वेन तदभिप्रेतत्वस्य सुमेरुश्रृंगी ढत्वात्। उकारांतत्वे पूर्व

शांकरी॰ पदत्वे उकारस्यैतदाप्रत्यापत्तभेदापत्तेश्च परत्वादुदात्तत्वे एकादेशेन तत्सिद्धेस्तदुत्तरभाष्ये एवस्पष्टत्वेन तस्यैकदेश्यु
२९ क्तित्वाच्च। अत एव तन्मायाश्रयणं। अन्यथानेनैव गतार्थत्वात्तदनर्थकमेव स्यात्। यदागमाइतितु न गतार्था आग
मस्याविकारत्वात्। अत एव लोपागमवर्णविकारज्ञो हीति भाष्ये आगमस्य विकारात्पृथगुक्तिः। घुसंज्ञायामकृतपरि
माणत्वाच्च। एवं च येन विधिरिति सूत्रभाष्यविरोधेनोदके केवल इति सूत्रभाष्यमेकदेश्युक्तं ज्ञापनपरं भाष्यं त
न्यायेन दीव्यतीत्येतत्स्वरूपालाभेपि देवनकर्तृरूपार्थलाभेन सुयोजमिति बोध्यं उक्तं खलास्तु येन विधिरिति सूत्र
भाष्यमेकदेश्युक्तिरेवोक्तहेतोः। अंगसंज्ञासूत्रे अंगसंज्ञायामप्युक्तपरिमाणत्वस्य भाष्ये उक्तत्वेनाचः परेति
सूत्रे आयस्साविन्यत्रानेनांगत्वातिदेशकरणेन तद्विरोधाच्च। लोकन्यायेनैव सिद्धे ज्ञापकानुधावनपरभाष्यविरोधा
च्च। तदेकदेशभूतमिति न्यायेन लोके आगमस्यापि विकारव्यवहारसत्त्वाद्यदागमाइति न्यायोपि मास्तु। अनेनैव ग
तार्थत्वादित्यपरमनुकूलमित्याहुः। विकृतानल्रूपेति। तेन यशशृ शब्दाणि चिटिलोपे अनेनासंतत्व लाभे।
न स्थानिवत्त्वेन तत्त्वमाश्रित्यासायामेधास्रजो विनिरिति विनिसिद्धिः। आभीयादिति इति। अत्रत्यं तत्त्वं सर्वमदादि राम॰
प्रकरणे शेखरे स्पष्टं। नन्वेवं भिंधीत्यत्रेति। नन्विदमनुपपन्नं तदभावे हेतोरनुक्तत्वात्पूर्वे सकारइति न्यायोपन्या॥ २९

तुकरणान्कथंज्ञापकमित्यपास्तं। ननु राम्नाविति। यथोद्देशे तु नेतदुपयोगः। तत्र भविष्यति किंचिदनेन प्रयो
जनमिति न्यायेन नित्यमप्येकादेशं बाधित्वा परनिमित्तकत्वेनांतरंगत्वात्पदत्वे एकादेशेऽपि आनुमानिकस्था
निवत्त्वेन तस्य सौ लभ्यात्। अत एव हे राम इत्यादौ पदत्वसिद्धिः। अन्यथा नित्यत्वात्सुलोपे सुवंतत्वस्य शास्त्रीयत्वे
न विशेषणतयाऽलाश्रयणे न च स्थानिवत्त्वाप्रवृत्त्या तत्तस्यानुतत्र सुवित्यक्तपरिमाणग्रहणे नन्यायाप्रवृत्तेः नि
रपि पाठस्तु युक्त एवातः तत्र सामान्यतस्तदसिद्धिर्नोक्ता। कार्यकाले तु सुवंतत्वस्य शास्त्रीयत्वेनओटत्ति सुप्त्वस्य
स्थानिसंबंध्यलधर्मत्वेन च स्थानिवत्त्वाप्रवृत्त्या तदसिद्धिरेव॥ यद्यपि अंगाकडाराधिकारस्थभपदसंज्ञादि।
विषये यथोद्देशपक्ष एवेत्युक्तं तथापि तत्संज्ञाद्वयप्रसक्तावेव तत्रैवातिप्रसंगात्। प्रकारांतरमपि तत्रैव निरूपि।
तं वस्तुतः इदं सर्वं प्राचीनरीत्या। स्वमते उभयत्र आश्रयणेऽपि तत्स्वीकारेणाभीयादित्यत्रव्यपवर्गाभावेनोपसर्गा
त्पररस्येणोऽभावेन लोपाभावेऽपि प्रकृतेयस्माद्विहितस्तदादितदंतत्वस्यतेन लाभेन पदत्वाप्रसक्तेः। भाष्ये उभयत्र
आश्रयणेनातातिदिवदिस्पुलेखसुसकदेशिन इति स्पष्टं शेखरादौ। स्वमते अवतरणं तु चिकीर्षति विदृत्सती
त्यादौ उ-- रद चिहलादिः शेषः सन्यतइत्वीत्वं च न स्यात् द्विरुक्तधातुपूर्वभागत्वाभावेन पुनरभ्यासत्वाप्रवृत्तेः॥

शांकरी. मन्यथा विभाषा श्वेरित्यत्र भावाभावाभ्यां संप्रसारणस्य पाक्षिकत्वे लब्धे न वेति विभाषेति सूत्रस्य लघ्यानुरोधमंगीकृत्य ।
३० प्रत्याख्यानासंगतेः। मम तु वचिस्वपीत्यस्य शुशुवुरित्यादौ चारितार्थ्ये न विभाषा श्वेरित्यस्य शुशाव इत्यादौ चारितार्थ्येपि उभा
भ्यां सूत्राभ्यां लिट्यनंतरे कित्यनंतरे संप्रसारणं साधित्यर्थकाभ्यां संप्रसारणस्य विधानेन विरोधाभावान्नियमार्थक
विप्रतिषेधसूत्राप्रवृत्त्या चारितार्थ्यात्। अत एवाग्रे वक्ष्यति एतन्नियमवशादेव तल्लक्ष्यविषयकपूर्वशास्त्रानुपप
चरणेवेति। कैयटोक्तप्रकारस्तु न युक्त इति स्पष्टं गदायां द्वयोः कार्ययोरिति। नावश्यं द्विकार्ययोग एव विप्रतिषेधः किं
नर्हि असंभवोपीति भाष्ये द्विकार्ययोगत्वाभावे केवलेप्यसंभव इति हि तेनोक्तं। तथा सुपि च बहुवचने झल्येदित्यनयोः
वृक्षेभ्य इत्यादौ युगपदसंभवः पजादिसुप्यनंतरे दीर्घः साधुः। झलादिबहुवचनांतरे एकारः साधुर्भवतीत्यर्थात्।
यद्यपि विधेयानि पात्यात तद्विशेषणत्वं दुरूपपदं। एवं च सुप्यनंतरस्यादंतस्य दीर्घ इत्याद्यर्थे युगपत्संभवेन ना
स्ति विरोध इति शक्यते वक्तुं तथापि शब्दानां नित्यत्वाद्व्याकरणस्य साध्वनुशासनतया साधुत्वस्यैव विधेयत्वेनैव
मेवोचितमिति स्पष्टमिको गुणेत्यत्र विवरणे। शिद्यादित्यत्राप्येवमेव। यद्यपि तत्रादेशानुवृत्तदुत्तरं वास्यानिवत्वादि राम.
स्थेयवतन्निमित्तानन्तर्यं तथापि तत्रापत्यवद्भेदकेकाले विरोधोस्त्येवेति बोध्यं। अत्रेदं बोध्यं। अन्यतरस्य तु निमित्ता ३०

नंतर्यसत्त्वेन्यतरस्यानर्दसत्त्वे नास्ति विप्रतिषेधः। यथा राजेत्यादौ दीर्घस्यैतन्निमित्तासत्त्वेपि हल्ङ्यादिलोपस्य तत्सत्त्वे
न विप्रतिषेधः किंतु प्रतिपदोक्तत्वाद्दीर्घस्यैवेति स्पष्टं शब्देन्दुशेखरे। यत्राप्येकमेव कार्यमुभाभ्यामपि बोध्यते तत्रापि
विरोधाभावान्न विप्रतिषेध इति स्पष्टं संबुद्धौ शाकल्यस्येति सूत्रे शब्देन्दुशेखरे। यथानंतरे नामि यञादौ सुपि च दीर्घः॥ सा
धुर्भवतीत्यर्थकयोः सुपि च नामीत्यनयोः रामाणामित्यत्र प्रवृत्तयोर्नास्ति विरोध इति तत्रैव शेखरे स्पष्टं। विप्रतिषे
ध शब्दस्य विरोधार्थकत्वात्। परस्परलब्धावकाशयोरिति फलितार्थपरं। अन्यतरानवकाशत्वे ऽपवादत्वापत्तेः। एवं
भिंधीत्यत्रेति। भिनद्धि इत्यत्रेत्यर्थः। भिंतादिनिलस्ये इति यावत्। यथाश्रुते त्वसंगतिः स्पष्टैवेति बोध्यं। राधने इत्या।
दावपिति। आर्धधातुके नियमस्य चानभिविकरणस्य च चारितार्थ्येन परत्वमिति भावः। ननु परत्वादित्ययुक्तं। कृता
कृतप्रसंगित्वेन विकरणानां नित्यत्वादिति चेन्न। अनुदात्तङित इत्यादीनामिदानीं नियमार्थत्वेन एधत इत्यादावनुप
पन्यभावेपि एधतीत्यादिनिवृत्तिमात्रफलकत्वेन तत्र च नियमशास्त्रप्रवृत्तौ तद्रूपस्यैवाभावेन विकरणाप्रा।
त्याकृताकृतप्रसंगित्वाभावात्। तद्विधानमिति। ननु तापि तेष्य चारितार्थ्यमेव विकरणात्प्रागेव नियमप्रवृत्त्या त
दानीं स्यपरत्वाभावेन नियमे बाधायोगात्। न च तदुत्तरस्य परत्वसंभवेन परिभाषामात्रबोधनेन चारितार्थ्येन

शांकरी. सामर्थ्याभावेपि तक्रकौंडिन्यन्यायेनापवादस्योपजनिष्यमाणत्वे तद्बाधे पूर्वं विकरणे पुनः प्राप्तस्य नियम
३१ स्य बाधनेन चरितार्थं तदिति वाच्यं। तक्रकौंडिन्यन्यायेन बाधितस्योत्सर्गस्य पुनरप्रवृत्तौ सामान्यशास्त्रेणोभ
यसिद्ध्या पुनरपि वैयर्थ्यस्य तदवस्थत्वात्। अत एवेदृशे विषये प्रथमयोः पूर्वसवर्ण इति सूत्रस्थकैयटो
क्तरीत्या न्यायानाश्रयणमत एव स्यतासिभ्यां तिवादिबाधो न एवं च कथं चारितार्थ्यमत आह। विषयसप्तमी
ति। एवं च नियमबाधनेन चारितार्थ्यं स्पष्टमिति भावः। विषयसप्तमीत्वस्वीकारे गौरवमत्र पक्षे ऽतो बाध।
वादाह। विकरणव्यवधानेपीति। एवं नित्यांतरंगयोरिति। अनयोः परापेक्षया बलवत्त्वमपि योगपद्यासं
भव एव बोध्यमित्यर्थः। विप्रतिषेधसूत्रेण परस्य तत्रैव बलवत्त्वबोधनेन तत्रानयोर्योगपद्यासंभवास्यै
वेति भावः। अनयोः परस्परबाधकत्वे इत्यर्थ इति नु न युक्तं मानाभावात्। धनंवनमित्यत्रार्थवत्पदाभावे ऽ
तरंगत्वादवयवानां प्रातिपदिकत्वे सुपि च कृते समुदायस्य प्रातिपदिकत्वात्तदवयवत्वेन सुपो लुगिति न तत्र।
सुपः श्रवणमित्यर्थवत्सूत्रस्थशब्दरत्नविरोधाच्चेति दिक्। असिद्धं बहिरंगमंतरंगे। अंतः शब्दार्थमाह। मध्य इ राम.
ति। अधिकरणशक्तिप्रधानस्याप्यंतः शब्दस्य बहिः शब्दस्य च शक्तिमत्परत्वेन भूतशब्देन गतिसंज्ञस्य तस्य ३१

सस्यैवसुक्तत्वात्। किंचतातङ्भावपक्षे भिंधीत्यत्रधिभावस्यस्थानिवत्सूत्रेभाष्ये साधितस्यासंगतिस्तत्र ध्यादेशे
पितातङ्प्रवृत्तौतदसंगतिरेव। किंचतातङ्धिभावयोर्यौगपद्यासंभवेनपरत्वात्तातङ्यपितातङ्धिभावयोर्यौ
गपद्यासंभवेनकोविरोधइतिचेत्। अयंभावः। विप्रतिषेधसूत्रस्यनियमार्थत्वेवृक्षेभ्यइत्यादौस्वीयस्वीयोद्देश्य
तावच्छेदकाक्रान्ततयाःसुपिचबहुवचनेझलीत्यनयोः प्राप्तयोःपर्यायतयाविप्रतिषेधेपरमित्यनेनपूर्वशास्त्र
स्यझलादिबहुवचनविषयेविषयत्वेलाभावोबोध्यते। अन्यथाशास्त्रद्वयप्रामाण्याद्विकल्पापत्तिः। इयतुरित्या
दावपिद्वित्वसंप्रसारणयोः प्राप्तयोः परंसंप्रसारणंभवतीत्यनेनोपदेशिकयजादिधातोःद्वित्वाविषयत्वंबो
ध्यते। तिसृणामित्यत्रापित्र्यर्थकत्रिशब्दस्यत्रयादेशाविषयत्वं। एवंचानायासेनैवसकृद्गतिन्यायःसिद्धः। तेन
शीरर्थसहेर्ध्य विषयत्वेनभिंतादित्यत्रतातङाबाधितोधिः। भिंधीत्यत्रतदभावेनस्यादिति। एवंचपुनःप्रसंगन्याये
नतस्याप्राप्तत्वात्स्वर्यसंकोचस्याभावोबोध्यतेइतियत्नलभ्योपं। तेनपूर्वंतदनुक्तावपिनक्षतिरितिसूचितं। नचैवंभिं
तादित्यत्रापिध्यादेशापत्तिस्तद्विषयकतातङ्शास्त्रोपप्लवानर्थक्यापत्तेः तेनतद्विषयेसकृद्गतिन्यायएवलग्नस्यानु
साराद्दाश्रियतइतिसूचितं। विकल्पस्याभावांशेपितात्पर्यसत्त्वेनोभयलक्ष्यकत्वादित्युद्दोपस्याप्युक्तमेववीज

शां०क० कस्मादिति नियताकांक्षायामुपस्थितत्वादंगादित्यस्यावधित्वेनान्वयेन सप्तम्यंतपंचम्यंतयोरपि निमित्तत्वसत्त्वात्॥
३२ हेर्विघ्नोऽइत्येतदवतरणोक्तशेखरविरोधोऽपीति ध्येयं। अपरे तु तत्सूत्रस्थानिवत्सूत्रस्थभाष्यप्रामाण्याद्वर्णग्रह-
णेऽपि तत्प्रवृत्तेरंगीकाराणलाक्षणिकत्वादेव पचावेदमित्यादावदोषः। षः प्रत्ययस्य चुटू इत्येकयोग एव कर्तव्ये पृथग्
योगकरणेन उत्तरस्य क्वाचित्कत्वबोधनेन चकारस्य प्रत्ययादित्वाभावाय प्रश्लिष्टयकारवैयर्थ्येन चुंचुवादाव
प्यदोषेणानेह शांतरंगत्वस्य फलं भवतीत्याहुः। तस्यां हि सत्यां बहिरंगसंप्रसारणस्यासिद्धत्वाल्लघूपधगुणो न स्या
दिति॥ नन्वत्र एव बहिरंगत्वं दुरुपपादं। संज्ञाकृतत्वस्यैकैयटोक्तस्यानुपदं सूचितत्वेन भसंज्ञायाहृष एवस्व स्व।
योरित्यादौ शसाद्यनपेक्षत्वेनाश्रितस्य शाब्दान्वयाभावस्य स्वयं सिद्धांतितत्वेन च परस्परानिमित्तत्वाश्रयणे माना
भावस्यानुपदोक्तत्वेन च भपदसंज्ञाविषयेयथोद्देशस्यैवाश्रयणेन चायुक्तमेतदिति चेन्न। भाष्ये एकदेशस्थत्वो
क्त्या संज्ञापरिभाषयोरैक्यस्यान्यत्र स्पष्टत्वे यैकवाक्यत्वलाभेन बहिर्भूतशसादिनिमित्तत्वेन तत्वस्य सुलभत्वात्।
स्थलविशेषभाष्यप्रामाण्येन परस्परानिमित्तत्वांगीकारात्। अत एव पदद्वयनिमित्तकसमासनिमित्तत्वेन लुको ए०म०
बहिरंगत्वमित्यंतरंगानपीति ज्ञापनपरसकलभाष्यादिसंगतिः। अन्तरा वाभ्यासनिमित्तनिमित्तत्वेन ह्रस्वस्य ३२

वहिरंगत्वमिति इह संङ्गिसूत्रे भाष्ये उदुयङ्वङोऽवहिरंगत्वमिति वार्णादांगमिति ज्ञापनपरत्वाश्वानिति सूत्रे च भाष्ये स्य
ष्टं एतेनानेन संज्ञाज्ञानत्तत्वं सूचितमित्यपास्तं। त्वदीयकैयटोक्तरीत्या गुणस्यैव वहिरंगत्वेन एवमप्यनुप त्तेश्चान
चैवमपि परनिमित्तत्वस्य उभयत्र तुल्यत्वेन कथं तत्त्वं संप्रसारणीयनिमित्तानेनर्ष्टनिमित्तत्वस्य गुणे सत्वात्यचा
वेदमित्यादौ तु प्रत्ययग्रहणेनोपस्थिततत्तदादेः परस्य विधीयमानस्यैत्वस्य गुणीयपदद्वयनिमित्तांतर्ष्टनिमित्त
कत्वसत्वेन न दोष इति वाच्यं। भसंज्ञकांगावयवस्य निर्दिश्यमानवाहावयवस्य यणः संप्रसारणमित्यर्थस्य वि।
श्वाद्यवयवयणस्तद्ध्यान्तत्यर्थमावश्यकत्वेनांगत्वस्य च वाहांतसत्वेन गुणनिमित्तस्य तदंतर्ष्टनत्वेन नतत्वमित्याश
यात्। न चैवं षष्ठ्यांतस्य निमित्तत्वामीकारे साग्रुक्तयेन विधिरिति सूत्रभाष्यविरोधः। तत्र हि ऊनशब्दमाश्रित्य गुणाद्
त्वंतरंगत्वाद्गुण एव स्यादित्युक्तं। त्वद्रीत्या गुणेपि इगंतांगस्यार्धधातुकस्य निमित्तत्वेनोभयोः समत्वात् तदसंगति
रिति वाच्यं। अर्थवत्त्वेवस्थान्यादेशविश्रांतिरिति सिद्धांते नानुमानिकस्थान्यादेशभावस्य सति संभवे सर्वसत्वेन सि
ऊड् इत्यस्यौदंतादेश इत्यर्थलाभेन च तस्य कार्यितया निमित्तत्वाभावादित्याशयात्। प्रकृते तु न तथा सूत्रे उच्चार्यमा।
णस्य वाह इत्यस्यार्थवत्त्वेनानुच्चारितांगस्य स्थानित्वकल्पने मानाभावेन तस्योपरंजकतयैव व्याख्यानस्योचितत्वेन का।

॥र्थित्वाभावात्। अत एव सन्यङोरित्यत्र सन्नंतस्योद्देश्यत्वेपि ऊर्णुनविषतीत्यत्र तु शब्दस्यैव।
द्वित्वरूपकार्यित्वेनेसोद्देत्वनिमित्तत्वं सिद्ध्यति। त्वदुक्तरीत्याषष्ठ्यंतस्य कार्यितया तद्घटकस्येसो नि
त्तत्वाभावे द्विर्वचनेचीत्येतदप्रवृत्तौ न दसंगतिरित्यलंकृतबुद्धिना ॥ इतिश्रीशांकरीटीकासमाप्ता
॥मिती श्रावनकृष्णसप्तम्यां ७ रविवासरे सम्वत् १९३५॥ः श्रीरामचंद्र॥

समासे नांतर्भूतशब्देन वा बहुव्रीहिः। तत्र मध्यत्वस्य सापेक्षत्वादाह। बहिरंगेति। निमित्तसमुदायेत्यध्याहारल।
भ्यं। एवं च यदीयनिमित्तसमुदायांतर्भूतांगकं शास्त्रं तदंतरंगं। एवं यदीयनिमित्तसमुदायाद्बहिर्भूतांगकंशा
स्त्रं तद्बहिरंगमिति वाच्योऽर्थ इति नान्योन्याश्रयः। मूलं तु फलितार्थपरमिति बोध्यं। अत एवेति। अंतरंगत्वात्त्र
यादेशे तस्य स्थानिवत्त्वात्त्रिशब्दत्वेन तिस्रादेशप्राप्तावपि ततोऽपि पूर्ववदंतरंगत्वान्नुटि दीर्घे च लक्ष्ये लक्षण।
स्येति न्यायेन तिस्रादेशेऽपि दीर्घाप्राप्त्या निषेधवैयर्थ्यं स्पष्टमेवेत्यर्थः। एतेन स्थानिवत्त्वात्तिस्रादेशेऽपि अंतरंग
दीर्घं तस्यासिद्धत्वेन तद्वैयर्थ्यमित्यपास्तं। असिद्धत्वस्याहार्यारोपबोधकत्वेन कार्यस्य स्थानिबुध्यादेशप्रवृ।
त्या निषेधस्योज्जीवनात्। विकारकृततल्लक्ष्यभेदस्यानाश्रयणस्यान्यत्र प्रपंचितत्वादिति बोध्यं। अपरनिमित्त
कत्वेनेति। अत एव पचावेदमित्यादौ एत्वं न। चुंचुपचणपोस्त्रुटद्नीत्वं च नेति भावः। इदमंतरंगत्वं च नापूर्वं तदी
यनिमित्तांतर्भूतनिमित्तत्वेन तत्त्वं बोध्यं। अत एव हेज्ञानेत्यादौ नित्यत्वात्पूर्वं रूपे कृते लोपसिद्धिरन्यथा परनि।
मित्तत्वेनांतरंगत्वाल्लोपेऽतो गुण इति पररूपे तत्सिद्धौ भाष्योक्तव्यधिकरणान्वयस्य तत्रत्यशेखरस्य चासंगतिः।
एतेऽद्रत्यत्र तदादेरित्युपस्थितावपि तदीयनिमित्तांतर्भूतत्वेन तत्त्वमक्षतं। संबुद्धौ परत्वाद्गुणो भवतीत्युक्ते

श्रीगणेशायनमः॥विद्याविनोदचतुरंविद्यादंविघ्ननाशनं तथाविधंमत्नुदेवंगुरुंवाग्देवतांभजे १ प्रश्नावल्यांहोरिलस्य
